तान्यार्तानि क्लिष्टानि करणानीन्द्रियाणि येषां रात्रौ विषयसुखलवोऽपि नास्ति यतो निशि निःशयानाः स्वप्नदर्शनेन च क्षणोत्क्षणभग्ननिद्राः दैवेनाहताः सर्वतः प्रतिहता अर्थरचना उद्यमा येषां १० तदेवं मम भक्तानां संसारनिवृत्तिमुक्त्वा भक्तानां तन्निवृत्तिमाह त्वमिति भक्तियोगेन परिभाविते हृत्सरोजे आस्से तिष्ठसि श्रुतेन श्रवणेनेक्षितः पन्था यस्य किंच श्रवणं विना पि त्वद्भक्ता मनसा यद्यद्वपुः ध्यायन्ति तत्तत् प्रणयसे प्रकटयसि सतां भक्तानामनुग्रहाय ११



राम:
३२

आदरेणात्वांभजंतः कृतार्था इत्याह ये त्विति श्रुतिर्वेदः सएव वातः तेन नीतमापितं नाथ हे विनापयासि येत्व
त्कथाश्रवणमत्यादरेण कुर्वंति तेषां हृदि नित्यं प्रकाशसइत्यर्थः ५ ततः किमत आह तावदिति द्रविणा
दौ विद्यमाने भयं गते शोकः पुनश्च स्पृहा ततः परिभवः तथापि विपुलो लोभः तस्मात्पुनः कथं चित्स्त्रात्ममेत्य
सदाग्रहः आर्तिमूलं भयशोकादेः कारणं न प्रवृणीत नाश्रयेत तत्त्वत्पादाश्रयणमात्रेणाभयादिनिवृत्तिः

येतुत्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतं भक्त्या गृहीतचरणः परया
च तेषां नाऽपैषि नाथ हृदयांबुरुहात्स्वपुंसां ५ तावद्भयं द्रविणदेहसुहृन्निमित्तं शोकः स्पृहा
परिभवो विपुलश्च लोभः तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेंघ्रिमभयं प्रवृणीत लो
कः ६ दैवेन ते हतधियो भवतः प्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रियाये कुर्वंति कामसुख
लेशलवाय दीना लोभाभिभूतमनसोऽकुशलानि शश्वत् ७

किं पुनस्त्वत्प्रकाशे सतीति भावः ६ ये नीचा सा अपि संतस्त्वां नाद्रियंते ते नरकभाज इत्युक्तं येतु त्वत्कथा
श्रवणादि विमुखाः संतः काम्यकर्मपरास्ते तिमंदा इत्याह दैवेनेति हतधियः नष्टमतयः प्रसंगात् श्रवण
कीर्तनादिरूपात् सर्वदुःखनिवर्तकात् विमुखानींद्रियाणि येषां अकुशलानि अशुभकर्माणि ७ श्री

द्वादशभिर्वर्षसहस्रैरित्युत्तरश्लोकस्थमर्थ्यात् ज्ञातव्यं अवधीयत इत्यवधानं संधानं संध्यावांशाभ्यां सहितं १८ कृतयुगे चत्वारि सहस्राणि संध्यायां संध्यांशे च चत्वारि चत्वारीत्यष्टौ शतानि च एवं त्रेतादिष्वपि योज्यं १९ युगस्यादौ संध्या अंते संध्यांशः उक्तानि शतानि संख्या ययोः तयोरंतरे यावान् कालस्तावान् युगं तत्स्वविशेषमाह यत्रेति गवालंभादिधर्मविशेषो यत्र विधीयत इत्यर्थः साधारणधर्मस्तु संध्यांशयोरप्यस्त्येव २० चतुष्पात् संपूर्णः त्रेतादिषु पादेन पादेन व्येति ह्रसति पादेन पादेन वर्धमानेनाधर्मेणेत्यर्थः एवंभूतस्वरूपकथनमात्रं वैराग्यार्थं न तु धर्मसंकोचार्थं २१ त्रैलोक्याः बहिर्महर्लोकप्रभृति ब्रह्मलोकमभिव्याप्य चतुर्युगसहस्रमेकं दिनं यत्र यस्य विश्वसृजः ब्रह्म

मैत्रेय उवाच ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितं १८ चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि च १९ संध्यासंध्यांशयोरंतरेण यः कालः शतसंख्ययोः तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते २० धर्मश्चतुष्पान्मनुजान् कृते समनुवर्तते स एवान्येष्वधर्मेण व्येति पादेन वर्धता [illegible] त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनं तावत्येव निशा तात यन्निमीलति विश्वसृक् २२ निशावसान आरब्धो लोककल्पोऽनुवर्तते यावद्दिनं भगवतो मनून् भुंजंश्चतुर्दश २३ स्वं स्वं कालं मनुर्भुंक्ते साधिकां ह्येकसप्ततिं मन्वंतरेषु मनवस्तद्वंश्या ऋषयः सुराः भवंति चैव युगपत् सुरेशाश्चानु ये च तान् २५

ति मीलति स्वपिति [illegible] तत्र दिनस्थितिमाह निशावसाने इत्यादि सार्द्धेन चतुर्भिः चतुर्दश मनून् भुंजन् पालयन् व्याप्नुवदित्यर्थः २३ किंचिदधिका युगानामेकसप्ततिर्मनुवंशाः एकैकापालकाः क्रमेण भवंति सप्तर्षिषु [illegible] मनवस्तु युगपत्समकालमेव भवंति सुरेशाः इन्द्राद्यास्तान् अनुवर्तंते ये गंधर्वादयस्तेऽपि २४

स्वस्वसंमतो यस्मात् तत्र यः शरीरविद्या उपासना समाधिरेकाग्रता तैर्निग्राम्य हृत्स्थाय यथाशक्तितो यतमानमपि [illegible] ग्रासम
नो लोकसंस्थानविज्ञानेन परिखिद्यतो ब्रह्मणोऽपि अतमालक्ष्यतमा हेति द्वयोरन्वयः तेन [illegible] आत्मा त्वेहं [illegible] क
कन्नमले [illegible] तिसहृद्गतानामनेतृत्वीयति २० हे वेदगर्भ तद्विषादकृत्तमालस्यमागाः त्वं वेदमयेनेति [illegible]
मपनुत्तोऽरतदं [illegible]

[illegible] मानाम [illegible] मतियो [illegible]
१८ [illegible]
भूत [illegible] तोऽपि [illegible] तस्मै तेनेमः २१

[illegible] नवचः स्तुत्या [illegible] रामस श्रोतवा [illegible]
[illegible] त्यकाति करं [illegible] २१ लोक [illegible]
[illegible] त्सालीनाय [illegible] कृतसेतु [illegible]
[illegible] यानुपहतो विरुद्धा [illegible] वृत्या [illegible] मुवा [illegible]

नातिप्रसीदतितत्र योपचितोपचारैराराध [illegible] सरणौ [illegible] भिर्माल्लिनिजनस्वसुखं वितरन् २०
नानाजनेष्ववहितः सुहृदन्तरात्मा [illegible] यो पकरणीयदनुग्रहेण तस्मै नमस्त उदरस्य भवाप
ययाच आराधने भगवतस्तवसत्क्रियार्थो [illegible] पतः [illegible] ने शरणाय २२
वनिपीतमेदमोहायबोधधिषणाय नमः परस्मै विश्वोद्भवस्थिति [illegible]
[illegible] मेश्वराय २४ यस्यावतारगुणकर्मविडंबनानि नामानि येऽसुनिगमे विवशा [illegible] मूर्तीणां मालाविधंतेय
सहसैव हित्वा संयान्त्यपावृतमृतं तमजं प्रपद्ये २५ [illegible] सन्निपर्यः
[illegible] तदातुप

[illegible] त्वनेश्वर्यं यं जन्मस्कृतेति यस्येति अवतारादीनां विडंबनमनुकरणमस्ति येषु तत्रावतारविडंबनानि [illegible]
दनादीनि गुणविडंबनानि सर्वज्ञो भक्तवत्सलदृत्यादीनि कर्मविडंबनानि गोवर्द्धनोद्धरणः कंसारिरित्यादीनि
सुविगमे पि विवशा अपि गृणाति उच्चारयंति केवलं शमलं पापं अपावृतं निरस्तावरणं अजं तं ब्रह्म प्राप्नुवंति २५

न्यायादीनां पूर्वादिक्रमेणोत्पत्तिमाह आन्वीक्षिकीति आन्वीक्षिक्याविद्या मोक्ष धर्म काम अर्थ विद्याः भूर्भुवः स्वरिति।
व्यस्तास्तिस्रो व्याहृतयः तासां समस्ता चतुर्थी प्रयाहाश्वलायनः एवं व्याहृतयः प्रोक्ता व्यस्ताः समस्ता इति यद्वा म
हरिति चतुर्थी तथा च श्रुतिः भूर्भुवः स्वरिति वा एतास्तिस्रो व्याहृतयः तासामु ह स्मैतां चतुर्थीं माहाचमस्यः प्रवे
दयते मह इतीति हृत्तवतः हृदयाकाशात् ४४ स्नुतः स्नायुतः अनुष्टुप् स्नावानीति श्रुतेः ४५ महाकल्पे ब्रह्मणा वरु
णो भवदित्युक्तं तदेव दर्शयन् वर्णानामुत्पत्तिमाह स्पर्श इति साधं स्पर्शाः कादिवर्गपंचकं स्वराः अकारादिः ४६

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः ४४ तस्योष्णिगा
सील्लोमभ्यो गायत्री च त्वचो विभोः त्रिष्टुम्मांसात् स्नुतोनुष्टुब् जगत्यस्थ्नः प्रजापतेः ४५ मज्जायाः पङ्क्ति
रुत्पन्ना बृहती प्राणतोऽभवत् स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः ४६ ऊष्माणमिन्द्रियाण्याहु
रन्तस्था बलमात्मनः स्वराः सप्त विहारेण भवन्ति स्म प्रजापतेः ४७ शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्ता
त्मनः परः ब्रह्मावभाति विततो नानाशक्त्युपबृंहितः ४८ ततोऽपरामुपादाय स सर्गाय मनो दधे ऋषी
णां भूरिवीर्याणामपि सर्गमविस्तृतं ज्ञात्वा तद्धृदये भूयश्चिन्तयामास कौरव ४९

ऊष्माणः शषसहाः अन्तस्थाः यरलवाः सप्तस्वराः षड्जादयः विहारेण क्रीडया ४७ शब्दब्रह्मात्मनः
ब्रह्मणः परमेश्वरो लिङ्गप्रकाशनात् इत्यादि व्यक्ता वैखरी अव्यक्तः प्रणवः तस्मात् ब्रह्मणः परः परमेश्वरः अ
भाति कीदृशः ब्रह्मत्वापरः पूर्णः तत्राव्यक्तात्मनो ब्रह्मत्वे विततावभाति व्यक्तात्मनो नानाशक्त्युपबृंहित इति दूर्
तया वभाति ४८ यावद्विस्तराः शक्तयः तावत् तमोभवत् ततोऽपरां प्रागभिहितां मायाशक्तिमुपादाय वृत्तान्त
न्तस्सृष्टस्य तत्पररूपग्रहणकारणमाह ऋषीणामिति पालाहिना ४९

याम
४४

त्रैलोक्यंवर्तयतीतितथा २५ स्वमूर्तिभिर्मन्वंतरावतारैर्मन्वादिभिरात्मभूतैराविष्कृतपुरुषाकारः सन्निदंविश्वंरक्षति
२६ रात्रिगतांस्थितिमाह पंचभिः तमइति तमोमात्रांलेशं प्रतिसंरुद्धः प्रत्याहृतोविक्रमोयेनानुगतमनुप्रविष्टमशेषंय
स्मिन् २७ तदेवस्पष्टयति तमेवेति अपिधीयंतइतिकर्मकर्तरिप्रयोगः तिरोहिताभवंतीत्यर्थः कथंनिर्मुक्तःर
हितःशशीभास्करश्चयथाभवतितथा २८ भगवच्छक्तिरूपात्संकर्षणमुखाग्निनाऊष्मणाअर्दिताः संतः

एषदैनंदिनःसर्गोब्राह्मस्त्रैलोक्यवर्तनः ति[illegible]देवानांसंभवोयत्रकर्मभिः २५ मन्वंतरेषुभगवान्
विभ्रत्स[illegible]स्वमूर्तिभिः मन्वादिभिरिदं[illegible]मवत्युदितपौरुषः २६ तमो[illegible]मुपादायप्रतिसंरुद्धवि
मः कालेनानुगताशेषआस्तेतूष्णींदिनात्यये २७ तमेवान्वपिधीयंतेलोका[illegible]दयस्त्रयः निशायामनु
वृत्तायांनिर्मुक्तशशिभास्करं २८ त्रिलोक्यांदह्यमानायांशक्त्यासंकर्षणाग्निना यान्त्यूष्मणामहर्लोका
ज्जनंभृग्वादयोर्दिताः २९ तावत्त्रिभुवनंसद्यःकल्पांतैधितसिंधवः प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः
३० अंतःसतस्मिन्सलिलआस्तेनंतासनोहरिः योगनिद्रानिमीलाक्षःस्तूयमानोजनालयैः ३१

जनलोकंयाति २९ कल्पांतेनएधिताःसिंधवःसमुद्राः उत्कटआटोपः क्षोभोयेषांतेचतेचंडवातेरिताऊर्मय
श्च ३० जनलोकआलयोयेषांमहर्लोकात्गतानामन्येषांचतैः ३१ ॥

रसायाः सकाशात् उत्थितः सन् संरुरुचे सम्यगशोभत तत्रापि अंभसि गदामुद्यम्यागच्छंतं रुंधानं प्रतिघ्नंतं न सह्यः सहना
हो विक्रमो यस्य तं दैत्यं सुनाभं चक्रं तद्वत्संदीपिततीव्रमन्युर्यस्य यद्वा मयि विद्यमाने किमिति परिभवं सहस इति सुनाभेन
संदीपिततीव्रमन्युः स भगवान् नृसिंहो गजमिव लीलया जघान ३१ गजेंद्रो जगतीं विभिंदन् क्रीडया विदारयन् गैरिक

स्वदंष्ट्रयोद्धृत्य महीं निमग्नां स उत्थितः संरुरुचे रसायाः तत्रापि दैत्यं गदयापतंतं सुनाभसंदीपिततीव्रमन्युः
३१ जघान रुंधानमसह्यविक्रमं स लीलयेभं मृगराडिवांभसि तद्रक्तपंकांकितगंडतुंडो यथा गजेंद्रो जग
तीं विभिंदन् ३२ तमालनीलं सितदंतकोट्या क्ष्मामुत्क्षिपंतं गजलीलयांग प्रज्ञाय बद्धांजलयोनुवाकैर्वि
रिंचिमुख्या उपतस्थुरीशं ३३ ऋ[illegible] जितं जितं ते जित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः
यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते ३४ ॥

यथा यथा अरुणगंडतुंडो भवति तथा तस्य रक्तमेव पंकस्तेनांकितौ गंडौ तुंडं च यस्य सं जघानेति पूर्वेणान्वयः ३२ प्रज्ञाय
आलक्ष्य अनुवाकैर्वेदैः किं सूक्तं तत्स हि ऋषयो वीक्ष्य तस्तुवुः ३३ भो अजित तेन त्वया जितं जितमिति संभ्रमे वीप्सा यद्वा भो
व्यते आक्रियत इति तया त्रयी वेदमयी तनुर्निलिल्युः लीनजाताः कारणं पृथिव्युद्धरणं तेन सूकराय ३४ श्रीरामः॥

५० युक्तकृता यथोचितं कुर्वतः अत एव कस्य ब्रह्मण इदं द्विधाभूतमित्याश्रयोक्त्या यम इत्यभिचक्षते ५१ यास्त्री सा शतरूपा महिष्यासीत् एधाम्बभूविरे वृद्धिं प्राप्ताः ५३ तदेवाह स चापीति ५४ यतः यासां संततिभिः ५५ इति तृतीये द्वादशोऽध्यायः १२

अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा न ह्येधंते प्रजा नूनं दैवमत्र विघातकं । ५० एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा कस्य रूपमभूद्द्वेधं यत्कायमभिचक्षते ५१ ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत यस्तु तत्र पुमान् सोऽभूत मनुः स्वायंभुवः स्वराट् ५२ स्त्री याऽऽसीच्छतरूपाख्या महिष्यस्य महात्मनः तदा मिथुनधर्मेण प्रजा ह्येधांबभूविरे ५३ स चापि शतरूपायां पंचापत्यान्यजीजनत् प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ५४ आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमां ५५ दक्षायादात्प्रसूतिं च यत आपूरितं जगत् ५६ इति श्रीभागवते महापुराणे तृतीयस्कंधे द्वादशोऽध्यायः १२ श्रीशुक उवाच निशम्य वाचं वदतो मुनेः पुण्यतमां नृप भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः १ विदुर उवाच स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने २ चरितं तस्य राजर्षेरादिराजस्य सत्तम ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ ३

अयोर्द्वयोः [illegible] मनोरपि [illegible] पुत्रो [illegible] १ स्वयंभुवः स्वपुत्रः तदेहांशत्वात् २ विष्वक्सेनो ह

हतप्रभो: सुरै: पृष्ट: प्राह पंचदशो विधि: तथोजं विप्रशापादि वैकुंठे विष्णुभृत्ययो: तदेवानां ब्राह्मणस्य संवादे प्रस्तावमुक्त्वोद
नीतद्वितीयं तु माह प्रजापत्यं काश्यपं तेजो वीर्यं परेषां तेजो हंतीति तथा आर्षं स्वपुत्राभ्यां करिष्यते यत्तु राणि अदं नंदी
ड नेन स्माच्छं कमाना १ तेन गर्भतेजसा हतालोके निरस्तसूर्यादिप्रकाशे हततेजस: हतप्रभावा: ध्वांतव्यतिकरं स
करं २ वेत्थ ज्ञानासि किंचिद् यस्मि यद्धि तो वयं संविग्ना भीता: अव्यक्ते विज्ञानं न स्पष्टं वर्त्तिज्ञानप्रकारो यस्य ३ अस्मा
कं परमेश्वरत्वेन स्तुवंत: प्रार्थयंते देव देवेति सप्तभि: लोकनाथानां त्रिखामणे भावविद् अभिप्रायज्ञोसि केनाभि
प्रायेण दितेर्गर्भो वर्द्धत इति जानासीत्यर्थ: ४ विज्ञानवीर्यं बलं यस्य हे दंभस्य दहम्रुपे पुषे प्राप्नवते गृहीतगुणभेद: स्वी

मैत्रेय उवाच ॥ प्राजापत्यं तु तत्तेज: परतेजोहनं दिति: दधार वर्षाणि शतं शंकमाना सुरार्दनात् १ लोके तेन ह
तालोके लोकपाला हतौजस: न्यवेदयन् विश्वसृजे ध्वांतव्यतिकरं दिशां २ देवा ऊचु: तम एतद्विभो वेत्थ
संविग्ना यद्वयं भृशं नह्यव्यक्तं भगवत: कालेनास्पृष्टवर्त्मन: ३ देवदेव जगद्धातर्लोकनाथशिखामणे
परेषामपरेषां त्वं भूतानामसि भाववित् ४ नमो विज्ञानवीर्याय माययेदमुपेयुषे गृहीतगुणभेदाय नमस्ते
व्यक्तयोनये ५ ये त्वानन्येन भावेन भावयंत्यात्मभावनं आत्मनि प्रोतभुवनं परं सदसदात्मकं ६ श्री

गुणाय येन व्यक्तस्य प्रपंचस्य योनये कारणाय न व्यक्तो केनापि प्रमाणेन विज्ञातो पोनिर्यस्येति वा सकाम तया भूति दुरंतं
दु:खमनुभवतो निष्कामभक्तान् स्तुवंत आह द्वाभ्यां ये त्वां अनन्येन निष्कामेन भावेन भक्त्या ध्यायंति आत्मनो जीवा
नां भावयतीति तथा स्वस्मिन् प्रोतानि ग्रथितानि भुवनानि येन चैतन्याचेतनप्रपंचकारणमित्यर्थ: तत्र हेतु: सदसदा
त्मकं कार्यकारणरूपं वस्तु तस्माभ्यां परं ६

यज्ञात्मतां प्रपंचयंस्तत्स्तवं ति रूपमित्यादि चतुर्भिः छंदांसि गायत्र्यादीनि यज्ञांगभूतछंदांस्यनुवादेन भगवद्वपुषावयवी
यतेवर्हिः शाखेदीर्घाभाव आर्षः इ त्रिचह्नषिचातुर्होत्रं होत्रादिकर्म चतुष्टयं ३४ स्रुक तुंडः तुंडे मुखाग्रे स्रुवो नासिक
योः इडाभक्षणपात्रं चमसाः ग्रहाश्च सोमपात्राणि प्राशित्रं ब्रह्मभागपात्रं ग्रस्यते अनेनेति ग्रसनं मुखं तत्र यच्चर्व
णं भक्षणं ३५ दीक्षा दीक्षणीयेष्टिः अनुजन्म वारंवारमभिव्यक्तिः उपसदस्तिस्र इष्टयः शिरोधरं ग्रीवा प्रायणी
यादीक्षानंतरेष्टिः उदयनीया समाप्तीष्टिः ते च दंष्ट्रे यस्य प्रवर्ग्यो महावीरः प्रत्युपसदं पूर्वं क्रियते सभ्यो होमरहितो

रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं [illegible] ध्वरात्मकं छंदांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वंघ्रिषु चा
तुर्होत्रं ३४ स्रुक्तुंड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरंध्रे प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्व
णं ते भगवन्नग्निहोत्रं ३५ दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः जिह्वा प्रवर्ग्यस्तव
शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते ३६ सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव दे
व धातवः सत्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञः क्रतुरिष्टिबंधनः ३७

ऽग्निः आवसथ्य उपासनाग्निः तयोर्द्वैकं तत्तव क्रतुरूपस्य शीर्षकं शिरः चितयः इष्टिकाचयनानि पंच असवः प्रा
णाः ३६ प्रातःसवनादीनि अवस्थितिः आसनं बाल्याद्यवस्था वा अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽति
रात्रोऽप्तोर्याम इति सप्त संस्थाविभेदाः त्वङ्मांसादि सप्त धातवः सत्राणि द्वादशाहादीनि बहुयागसंघातरूपा
णि असोमा यज्ञाः ससोमाः क्रतवः तद्रूपस्त्वं इष्टिर्यजनमनुष्ठानं तदेव बंधनं यस्य सः ३७ श्रीकृष्णाय नमः॥

स्वरूपानंदादपि तेषां भजनानंदाधिक्यमाह तस्य पदारविंदकिंजल्कैः केसरैर्मिश्रायातुलसी तस्या मकरंदेन युक्तो वायुः स्ववि
वरेण नासाछिद्रेणांतर्गतः अक्षरजुषां ब्रह्मानंदसेविनामपि संक्षोभं चित्ते तिहर्षं तनौ रोमांचं च ४३ हर्षकारितं संभ्रममाह ददृशुः
ते वै किलामुष्य वदनमेवासितपद्मस्य कोशोंतर्भागस्तं असितत्वेषं कोशमित्युपमा सुंदरतरः अरुणो अधरो यत्र कुंदवत्
हासो यस्मिन् तं तत उत ऊर्द्ध्वमुपलब्धमनोरथाः संतः नखा एव अरुणमणयस्तेषां आश्रयं आश्रयभूतं संघ्रिद्वंद्वं पुनरवे

तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः अंतर्गतः स्वविवरेण चकार तेषां संक्षो
भमक्षरजुषामपि चित्ततन्वोः ४३ ते वा अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य सुंदरतराधरकुंदहासं लब्धाशि
षः पुनरवेक्ष्य तदीयमंघ्रिद्वंद्वं नखारुणमणिश्रयणं निदध्युः ४४ पुंसां गतिं मृगयतामिह योगमार्गैर्ध्या
नास्पदं बहुमतं नयनाभिरामं पौंस्नं वपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः ४५

क्ष्य ध्यानविषयत्वेन पुरस्कृत्य निदध्युः ध्यानं चक्रुः सर्वांगस्य ध्यानं कृत्वाग्रतो ध्यानं चक्रुः पश्चात् निदध्युः ध्यानं चक्रुः ४४ योगमार्गैर्गतिं
मृगयतां पुंसां ध्यानस्यास्पदं युक्तं बहुमतं कृपादृष्ट्यास्पदं बहूनां नयनहरं समंतान्निर्जितावापौंस्नं पौरुषं वपुर्दर्शयंतं अन्ये
ष्वसिद्धैरसाधारणैः औत्पत्तिकैर्नैसर्गिकैर्माद्यैरष्टैश्वर्यैर्युतं समगृणन् सम्यगस्तुवन् ॥ ४५ ॥ श्रीकृष्णायात्मने नमः॥

जितः श्वासः इंद्रियाणि आत्मा मनश्च यैः अतः सुपक्वयोगाः अत एव प्राप्तो युष्मत्प्रसादो यैः तेषां ७ अन्यं तु नित्यकर्मेति जितः श्वासं इंद्रियाणि आत्मा मनश्च यैः अतः सुपक्वयोगाः अत एव प्राप्तो युष्मत्प्रसादो यैः तेषां ७ अन्यंतुनित्यकर्मेलो
त्रीन्‌ इत्याह यस्येति तं त्वा दाम्ना आयताः अधीनाः गुर्व्याः पतिं यंत्रे प्राणरूपा यतिवाते थाच [illegible] तस्य वाकृतं तित्रीं
मानि दामानि इत्यादि ८ तमसा अहो रात्रादि विभागाभावेन लुप्तविकर्मणि शये वा आपन्नान्‌ आपद्गतान्‌ अस्मान्‌ कुर्वन्‌ ९
आत्मकारणमा [illegible] तस्य वि [illegible] अर्पितं निहितं कोऽप्युपमोजो वीर्यं दिशास्ति मिरयन्‌ तमोव्याप्ताः कुर्वन्‌

[illegible] नैव [illegible] ७ यस्य वाचा प्रजाः सर्वा गावस्तं
तेषां सुपक्वयोगानां जितश्वासेंद्रियात्मनां [illegible] तमसः सुम्भकर्मणां अदभ्रदय
स्वया चित्ता हरन्ति बलिमायतास्तस्मै मुख्याय [illegible] एष देवदितेर्गर्भ ओजः काश्यपमर्पितः दिशस्तिमिरयन्‌ सर्वा वर्धते ऽग्नि
रिवैधसि १० मैत्रेय उवाच स प्रहस्य महाबाहो भगवान्‌ शब्दगोचरः प्रत्याचष्टात्मभूर्देवान्‌ प्रीणयन्‌
रुचिरया गिरा ११ ब्रह्मोवाच मानसा मे सुता युष्मत्पूर्वजाः सनकादयः चेरुर्विहायसा लोकाल्लोके
षु विगतस्पृहाः १२ त एकदा भगवतो वैकुण्ठस्यामलात्मनः ययुर्वैकुण्ठनिलयं सर्वलोकनमस्कृतं १३ व
संति यत्र पुरुषाः सर्वे वैकुण्ठमूर्तयः येनिमित्तनिमित्तेन धर्मेणाराधयन्‌ हरिं १४

दितेः कुक्षौ स्थितं ज्ञात्वा प्रहस्य देवानां ये शब्दा विज्ञप्तिवाक्यानि तेषां गोचरः विषयभूतः प्रत्यभाषत ११ युष्मत्सकाशात्पूर्वं
जाताः १२ वैकुण्ठाख्ये लोके ययुः तं वर्णयति वसंतीत्यादि द्वादशभिः वैकुण्ठस्य हरेरिव मूर्तिर्येषां ते निमित्तफलं निमि

श्री॰
भा॰ट॰
५१

हतप्रभैः स्वरैः २६ आह पंचदशे विधिः तद्बीजं विप्रशापाद्वैकुंठे विष्णुभृत्ययोः १ तदेवं देवानां ब्रह्मणश्च संवादप्रस्तावमुक्त्वेदानीं तं संवादं व
क्तुमाह प्राजापत्यं काश्यपं तेजो वीर्यं परेषां तेजो हंतीति तथा आर्यः स्वपुत्राभ्यां कौशिकेन यत्सुराणां अर्द्दनं तस्मात् शंकमाना तेन गर्भतेजसा
हतालोके निरस्तसूर्यादिप्रकाशे हतौजसः हतप्रभावाः ध्वांतेन व्यतिकरं संकरं २ वेत्थ जानासि यद्यतो वयं संविग्ना भीताः अव्यक्तं अज्ञातं न
स्पृष्टवर्त्मज्ञानप्रवाहो यस्य ३ ब्रह्माणं परमेश्वरत्वेन स्तुवंतः प्रार्थयंते गर्भप्रसूतेन नूनमसुरार्द्दनो हनिष्यतीति देवेति सप्तभिः लोकनाथा

मैत्रेय उवाच प्राजापत्यं हि तत्तेजः परतेजोहनं दितिः दधार वर्षाणि शतं शंकमाना सुरार्द्दनात् १ तेन
लोके हतालोके लोकपाला हतौजसः न्यवेदयन्विश्वसृजे ध्वांतव्यतिकरं दिशां २ देवा ऊचुः त
म एतद्विभो वेत्थ संविग्ना यद्वयं भृशं न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ३ देवदेव जगद्धात
र्लोकनाथशिखामणे परेषामपरेषां त्वं भूतानामसि भाववित् ४ नमो विज्ञानवीर्याय माययेदमु
पेयुषे गृहीतगुणभेदाय नमस्तेऽव्यक्तयोनये ५ ये त्वानन्येन भावेन भावयंत्यात्मभावनं आत्मनि
प्रोतभुवनं परं सदसदात्मकं ६

तां देवादीनां त्वमरो भाववित् अभिप्रायज्ञोसि केनाभिप्रायेणादितेर्गर्भो वर्द्धत इति जानासीत्यर्थः ४ विज्ञानं वीर्यं बलं यस्य इदं ब्रह्मदेहमु
पेयुषे प्राप्तवते गृहीता गुणाभेदाः रजोगुणाय येन अव्यक्तस्य प्रपंचस्य योनये कारणाय न अव्यक्तो केनापि प्रमाणेन विज्ञातायेति वा ५ येनातां अनन्येन निष्कामेन भावेन भक्त्या ध्यायंति आत्मनो
सकामनया प्रतिद्वंद्वं त्वमनुभवंतो निष्कामभक्तो स्तुवंत आरूढी भा चेतनाचेतनप्रपंचकारणमित्यर्थः तत्र हेतुः सदसदात्मककार्य
जीवात्मभावयंतीति तत्त्वात्संस्थिता आत्मानि प्रोतानि भुवनानि येन
कारणात्पूर्वं वस्तुतः प्राप्तं ६

॥ ॥ ॥

हीनत्वं हि ... योगैर्हेमेव ... शोधने तथा यस्य शीलं स्वभावं अनुवर्तितुं अनुगंतुं माधवं निर्वैरादिभिर्योगैरात्मानं भावयिष्यति ४५ विश्व प्रसादे हेतुः यदात्मकं स्वदृक् आत्मसाक्षी यस्यानन्यया भगवानेव सत्य इत्येवंभूतया दृशा तोष्यते तोषं प्राप्स्यते तत्र हेतुः स वा इति महात्मा अपरिच्छिन्नदृष्टिः महानुभावः महाप्रभावः महतामपि मध्ये महिष्ठः अतिशयेन महान् प्रवृद्धया भक्त्यानुभाविते संशोधिते चित्ते वैकुंठं हरिं निवेश्य देहाद्यभिमानं त्यक्ष्यति ४७ महाभागवतत्वमाह अलंपट इति शीलधरः सुस्वभावः गुणानां धैर्यादीनामाकरो जन्मभूमिः परेषां समृद्धा

योगैर्हेमेव दुर्वर्णं भावयिष्यति साधवः निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुं ४५ यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकं सस्वदृग्भगवान्यस्य तोष्यतेऽनन्यया दृशा ४६ सवै महाभागवतो महात्मा महानुभावो महतां महिष्ठः प्रवृद्धभक्त्या ह्यनुभाविताशये निवेश्य वैकुंठमिमं विहास्यति ४७ अलंपटः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखितेषु अभूतशत्रुर्जगतः शोकहर्ता नैदाघिकं तापमिवोडुराजः ४८ अन्तर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपं पौत्रस्तव श्रीललनाललामं द्रष्टा स्फुरत्कुंडलमंडिताननं ४९ मैत्रेय उवाच श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशं पुत्रयोश्च वधं कृष्णाद्विदित्वासीन्महामनाः ५० इति श्रीभागवते तृतीयस्कंधे चतुर्दशोऽध्यायः १४

[दुः]खितः हृष्टः परेषु दुःखितेषु सत्सु स्वयं व्यथितः अभूतो जातः शत्रुर्यस्येति ... यथा हरति एवं जगतः शोकहर्ता भविष्यति ४८ अपरिच्छिन्नदृष्टित्वमाह अन्तरिति स्वपूरुषाणामिच्छया धनः पुनर्गृहीतानि रूपाणि येन श्रीरेव ललना तस्याः ललामं भूषणं द्रष्टा द्रक्ष्यति ४९ महामनाः सन्तोषाचितः हरिणा सह युद्धेन मरणात्पुत्रयोः कीर्तिः सर्वत्र भवेदिति ५० इति तृतीयस्कंधे चतुर्दशोऽध्यायः १४

श्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् इति गीताद्युक्तः मार्गेणाक्रियमाणोपि दुष्करः समाधिः तत्राहि पर
मानंदमूर्तौ हरौ ध्यायमाने यत्नत एव चित्तोपरमो भवतीति तदुक्तं हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो गतिमन्वीं
युङ्क्ते इति अतः स एवोपदिष्टः अयोगस्य लक्षणोवद्धेस बीजस्येति तदेवाः पत्नसि इत्व दर्शयति एवं ध्यानमार्गेणाहरौ
प्रतिलब्धभावः प्रेमपेन तया भक्त्या द्रवत् हृदयं यस्य प्रमोदादुद्गतानि पुलिकानि यस्य औत्कंठ्यप्रवृत्ताश्रुकल
याच मुहुरर्द्यमानः आनंदसंप्लवे निमज्जमानः दुर्ग्रहस्य भगवतो ग्रहणे बडिशमत्स्यबंधनमिवोपायभूतं चित्तम
पि श्लेषादिवियुक्ते तदा रेणाशिथिलप्रयत्नो भवतीत्यर्थः ३४ यर्हि यदा एव निर्विषयं भवति अत एव मुक्ताश्रयं वध्ये
यसंबंधं विना ध्यातव्यस्यानासंभवात् नच एवंवत् शब्दादिविषयस्यात् यस्तत्र विरक्ते परमानंदानुभावेन अ

एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् औत्कंठ्यबाष्पकलया मुहुरर्द्यमानस्त ॥
च्चापि चित्तबडिशं शनकैर्वियुंक्ते ३४ मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथार्चिः ॥
आत्मानमत्र पुरुषोव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥ सोप्येतया चरमया मनसो निवृ
त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये हेतुत्वमप्यसति कर्तरि दुःखयोर्यत् प्रत्यात्मनः स्मृत उपलब्धपरा

श्री कृष्णाय

निर्वाणं लयम् ऋच्छति निवृत्तिरूपतां परित्यज्य ब्रह्माकारेण परिणाम इत्यर्थः यथार्चि
रूपेण परिणमति अत्र अस्यां दशायां अव्यवधानं धातृध्येयविभागशून्य
निवृत्तो परतो गुणप्रवाहो देहाद्युपाधिर्यस्य न च मुक्तो न्यित इव पुनः स
तस्मिन्महिम्नि ब्रह्मरूपे अवसितः अवसाननिष्ठां प्राप्तः कथमनेन सोपि इत्यावर
तत्र अविद्यालिन त्विदानीं अत्र हेतुः ज्ञातः एव योतो सम्यासक्त नवत्सपः नन्वेवमा
आह सुखदुःखयोर्हि तत्त्वभोक्तृत्वं यत्पूर्वमासीत् तदपि इतिस ... तेकत्वेनात्मनो

षयोपगमेनतत्
मूलगा ... ते

य तत्स्वया भूत्वा शोभया अलिभिः परिसेव्यमानं मीनद्वयाश्रयं च श्रीनिकेतनं पद्ममधितिष्ठति पद्मं तेन [illegible] कुंतल [illegible]
मार्च्चे पः नेत्रपद्मयेन मीनद्वयस्येति दृष्टांत अवाद्वनेत्रे यस्मिन्नित्युपमानांतरं उल्लसत्पोभवौ यस्मिन् मनोमये मनस्यावि
भावात् ३० कृपया अधिकमित्यर्थः अस्तिग्धो निस्तृष्टप्रमुक्तं स्निग्धस्मितेनानुगुणितं तेन युक्तं विपुलः प्रसादो यस्मिन् गुहा
याहृदि ३१ अवनताये अखिललोकास्तेषां तीव्रशोकेन यान्यश्रूणि तेषां सागरं विशोषयतीति तथा तं हरे हासं असम्यक्
दारभ्रूमंडलं च ध्यायेत् कथंभूतं निजमायया मकरध्वजस्यापि संमोहनाय रचितं मुनिकृते मुनीनामुपकाराय संमोहनेप्रच्छे

यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्यास्वया कुटिलकुंतलवृंदयुक्तं मीनद्वयाश्रयमधितिष्ठति पद्मनेत्रं ध्यायेन्म
नोमयमतंद्रित उल्लसभ्रू ३० तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः स्निग्धस्मि
तानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विनतभावनया गुहायां ३१ हासं हरेरवनताखिललोकतीव्रशोकाश्रुसाग
रविशोषणमत्युदारं संमोहनाय रचितं निजमाययास्य भ्रूमंडलं मुनिकृते मकरध्वजस्य ३२ ध्यानायनं प्रहसि
तं बहुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्तिः ध्यायेत्स्वदेहकुहरेवसितस्य विष्णोर्भक्त्यार्द्रयार्पितमना
न पृथग्दिदृक्षेत् ३३

प्रहसितं उच्चैर्हसितं ध्यायेत् कीदृशं ध्यानायनं
तं काममेव मोहयितुमित्यर्थः मंदहासध्यानमुक्त्वा स्फुटहासध्यानमाह विष्णोः प्रहसितं उच्चैर्हसितं ध्यायेत् [illegible] भूतास्तनवः
अतिसुंदरं तया प्रयत्नं विनैव ध्यानस्य विषयभूतसौंदर्यमेवाह बहुला अधिकया अधरोष्ठस्य कांत्या अरुणीभूतास्तनवः
सूक्ष्मद्विजाएव कुंदसुकुलानि तेषां पंक्तिः स्फुरति यस्मिन् तत् स्वदेहकुहरे हृदाकाशे अवस्थितस्य ज्ञातस्य प्रेमरसेनार्द्रया
भक्त्या तस्मिन्नेवार्पितमनाः सन् पृथक् तद्व्यतिरिक्तं द्रष्टुं नेच्छेत् चित्तं न विचालयेदित्यर्थः समाधिमाह एवमिति द्वाभ्यां नि
र्बीजः सबीजश्चेति द्विविधो योगः तत्र निर्बीजयोगपरतोयतो निश्चरति मम श्चलद्धि ३१ श्रीकृष्णाय नमः श्रीरामाय नमः

श्री
भा त
टी टी
५८
स

उपसंहरति यदैवमिति त्रिभिः बहुभिर्जन्मभिर्यस्मिन्काले २२ प्रतिबुद्धार्थो विदितात्मतत्त्वः कैवल्याख्यं ब्र
स्वरूपात्मकं सुखरूपं मदाश्रयं निःश्रेयसं मोक्षं प्राप्नोतीदं २९ स्वदृशा आत्मज्ञानेन छिन्नसंशयः
आत्मानियस्य लिंगाल्लिंगनिर्गमे लिंगशरीरनाशे सति गत्वा न निवर्त्तते इत्यर्थः ननु तत्र अणिमादिसिद्धयो नान्तरायरूपा भ
वंति नासु योगेनोपचितासु मायासु यदा सिद्धस्य चेतो न विषज्जते अन्यथा तास्तु यदा सिद्धस्य चेतो न विषज्जते अथ तदैव मे

यदैवमध्यात्मरतः कालेन बहुजन्मना। सर्वत्र जातवैराग्य आब्रह्मभुवनान्मुनिः २८ मद्भक्तः
प्रतिबुद्धार्थो मत्प्रसादेन भूयसा निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयं २९ प्राप्नोतीहां
जसा धीरः स्वदृशा छिन्नसंशयः यद्गत्वा न निवर्त्तेत योगी लिंगाद्विनिर्गमे यदा न योगोपचि
तासु चेतो मायासु सिद्धस्य विषज्जतेंग अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृत्युहासः
इति श्रीभागवते महापुराणे तृतीयस्कंधे सप्तविंशतितमोऽध्यायः २७ श्रीभगवानुवाच यो
गस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे मनो येनैव विधिना प्रसन्नं याति सत्पथं १ स्वधर्मा
चरणं शक्त्या विधर्माच्च निवर्त्तनं दैवाल्लब्धेन संतोष आत्मविच्चरणार्चनं २ ग्राम्यधर्म

मात्नः अष्टाविंशे अष्टांगमतिक्रांतो तत्संहतो योगेन तत्त्वं बुध्यनिपुणपदसांगतो समपोऽह्यात्मा न भवति विषयासक्तो ह
सिद्धोपि मया न वर्णितः इति प्राप्ते ह्यासोगवेभिवन्दी मयि इति तत्त्वनियममविष्टाः अष्टविंशतिनाष्टांगयोग
नध्यानेनामिनात्मविषयाधिविनिर्मुक्तस्वरूपज्ञानेतः १ भक्तिं सेत्सपुनः प्रोक्तां स्वमार्गं योगविस्तरे अध्या
हृद्बलं योगमहात्म्यं ... १ तेवयमनियमानेतेह् विधिः

ध
अ

ततः किमत आह अकर्तुरिति येगुणा आश्रयो यस्य सः तेषु प्रकृतेर्गुणेषु सत्सु पुरुषस्य कैवल्यं कथं ॥ अतएव
कस्यचिन्निवृत्तप्रायस्यापि संसारभयस्य पुनरुद्भवो दृश्यत इत्याह क्वचिदिति २० न प्रकृतिसंबंधमात्रं बंधहेतुः किं
तु गुणकृतज्ञानाद्यासक्तिः तन्निवृत्तौ तत्त्वं मोक्षोपपत्तेः तत्र क्वचिद्दृढं साधनवैकल्यादित्यभिप्रेत्य साधनातिशयं
कथयन्नुपदिशति त्रिभिः अनिमित्तं फलं तदनभिसंधिः तन्निमित्तं प्रवर्तकं यस्मिन् निःकामेन धर्मेण अमलात्मना निर्मल

अकर्तुः कर्मबंधोयं पुरुषस्य यदाश्रयं गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं ॥१९॥ क्वचित्तत्वाव-
मर्शेन निवृत्तं भयमुल्बणं अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते २० श्रीभगवानुवाच
अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरं ज्ञानेन दृ-
ष्टतत्वेन वैराग्येण बलीयसा तपोयोगेन युक्तेन तीव्रेणात्मसमाधिना २२ प्रकृतिः पुरुष-
स्येह दह्यमाना त्वहर्निशं तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः २३ भुक्तभोगा परित्य-
क्ता दृष्टदोषा च नित्यशः नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च २४ यथा ह्यप्रतिबुद्धस्य
प्रस्वापो बह्वनर्थभृत् स एव प्रतिबुद्धस्य न वै मोहाय कल्पते २५ एवं विदिततत्वस्य प्रकृति-
र्मयि मानसं युंजतो नापकुरुत आत्मारामस्य कर्हिचित् २६

नर्मणा श्रुतेन कथाश्रवणेन संभृतया पुष्टया २२ दह्यमाना अभिभूयमाना तिरोहिता भवति २३ एवं
दर्शति पुनरुद्भवो नास्तीत्याह भुक्तभोगेति भुक्तो भोगो यस्याः नित्यशः सदा दृष्टो दोषो यस्याः अतएव परित्यक्ता अ
ईश्वरस्य अशुभं धत्ते तत्र स्वे महिम्नि स्थितस्य स्वानंदप्राप्तस्य २४ अविवेकावस्थायामनर्थहेतुरपि विवे-
कावस्थायां न भवतीति सदृष्टांतमाह यथेति हि यस्मात् प्रस्वापः स्वप्नः बह्वनर्थान् बिभर्ति स एव प्रतिबुद्धस्य

यत्यस्मात् एवंभूतोयं तस्मादेवमाक्रीड्य दृ देवयथा अस्थितं क्रमितं अत्री विषसर्प्येवाल: पुच्छाकर्षणादिना क्रीडयति तद्वत् २४।
स्वा आसुरी देवमाया अस्यापरूपं २५ वेलामेवाह एषेति लोकानां छवंकरी विनाशकरी छव इत्यव्ययं विनाशो वर्तते २६ अ
भिजिनाम्न: स एव मौहूर्तिको योग: सन्मुहूर्त: सुभद: काल: आगात् गत प्राय: अतो यावन्मुहूर्तशेषोस्ति तावदेव दुस्तरमेनं
निरस्तरजाहि २७ त्वां मृत्युं त्वयेव शापानुग्रहकाल्ये विहितं निर्मितं आसादित: प्राप्त: शर्मणि सुखे अधिहि स्थापय २८

मेनं मायाविनं दृप्तं निरंकुशमसत्तमम् आक्रीड्य बालवद्देव यथाशीविषमुत्थितम् २४ नयावदेष वर्द्धेत स्वां वेलां प्राप्य
दारुणः स्वां देवमायामास्थाय तावद्ध्यघमुल्वण २५ एषा घोरतमा वेला लोकच्छवंकरी विभो उपसर्पति वि
श्वात्मन् सुराणां जयमावह २६ अधुनैवाभिजिन्नाम योगो मौहूर्तिको ह्यगात् शिवाय नस्त्वं सुहृदामाशु निस्त
र दुस्तरं २७ दिष्ट्या त्वां विहितां मृत्युमयमासादितः स्वयं विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि २८ इति
श्रीभागवते महापुराणे तृतीयस्कंधे [illegible] ॥ मैत्रेय उवाच ॥ ॥ अवधार्य विरिंचस्य निर्व्यली
कामृतं वचः प्रहस्य प्रेमगर्भेण [illegible] ग्रहीत् १ ततः सपत्नं मुखतश्चरंतमकुतोभयम् जघानोत्पत्य
गदया हनावसुरमक्षजः २

इति श्रीतृतीये अष्टादशोऽध्यायः १८॥ उनविंशे विरंच्यादिप्रार्थितेन महामृधे वराहेण हिरण्याक्षवधः श्लाघ्योऽनुवर्ण्यते १ निर्व्य
लीकं तदमृतं च पाषंडतरे निःकपटा: अभिप्रायं च तदुक्तं च कालात्मनोपि मम मुहूर्त्तं बलं सुदिशतीति प्रहस्य अपांगेन लोकनेन
स्वीकृतवान् १ मुखतः अभिमुखे हनौ कपोले तस्याधोभागे ठोऽक्षजः ब्रह्मणो घ्राणेन्द्रियादाविर्भूत: ॥ २ ॥ श्रीकृ[illegible] नम:





25

।निसंग्रह्लरूपेण प्रकाशस्वेनतच्छिवं रहनीं तत्परमं मंगलं विमुक्तत्वश्रीमत्त्वीप्रत्यक्षमीऽसि अहो भाग्यमस्माकमित्याहुः हे अनंत यस्त्वं हृ
द्गतोऽपि दूरात्मनामंतर्हितो नस्फुरसि स नोऽस्माकमंतर्हितो न भवसि नयनमूलं यद्दर्शनेन पापनाशो प्राप्तोऽसि पुंतरीनाभावे तत्र भवतः सको
शादुद्भवाय स्पतेनास्माभिश्चापि यदेव अनुवर्णितं [illegible] सः तद्भवतः कर्णमार्गेणागृहीता कृतिंगतः प्राप्तोऽसीति ४६ ननु
[illegible] भवतामहमपमानं तत्वं [illegible] नैवं प्रश्नप्रमाभिर्मयामेहे निरासादित्याहुः नामित्ति हे भगवन्नस्माभिस्त्व
मेव परं तत्वं वेदाः मविद्यः अस्माभिज्ञानीमः ननु [illegible] प्रतः प्राहुः सत्येनापि विमुक्तसत्वम्
एवं भक्तानां सत्वं प्रति [illegible] संप्रति रति [illegible] तारयंतः श्रीमत्त्वमेताहुः तेऽनुतापः कृपात्तेन [illegible] ज्ञाते दृष्टे भक्तियोगे

कुमाराऊचुः योत्तर्हितोहृदिगतोऽपि दुरात्मनां तास्मादभिमुखं [illegible] समूलमनंतराद्यः यस्यैव कर्णविवरेण गुहांग
तोनः पित्रानुवर्णितरहो भवदुद्भवेन ४६ तं त्वाविदामभगवन्नमानिजगहामतिल [illegible] स अनिरतिरचयतमेषां य
नेनुत्तापविदितैर्दृढभक्तियोगैरुद्ग्रथयो हृदि विदुर्मुनयो विरागाः [illegible] पविगए यत्पापतेप्रसादं [illegible]
न्यदर्पितभयं भ्रुवउन्नयैस्ते येंगत्वदंघ्रिशरणा भवतः कथायाः कीर्तन्यतेऽयरसाः कुशला रसज्ञाः ४७

स्वयमपि भक्तिं ग्राहयितुं भक्तानां सुखा
श्रवणादिभिः मुनयो हृदि यच्छिद्रं कीदृशाः उत्थाय पौ निरहंमानाः प्रतरावविगततरागाः ४७ [illegible] तेऽन्नात इंडाद्विपदं तेभ्रूवउन्नयैरन्नेः
तिशय माहुः प्रत्यंतिकं मोक्षारम्भमपि तव प्रसादं तेन गणयंति [illegible] किं तुकि [illegible] पावनी पले
ज्जभितेः ग्रर्पितानि हितं भयं यस्मिन् नत तेऽ [illegible] भगवन् ये भगवतः कथायां रसज्ञाः [illegible]
न च कीर्तयत्वं कीर्तिनाहं तीर्थं पदणीयस्य ४८ श्री श्री श्री श्री श्री श्रीकृष्णजी सहाय॥

गाहास्थ्ये दयां कृत्वा संन्यासेन चाभयं दत्वा मयि आत्मानं जगच्चैकीभूतं द्रक्ष्यसि ३१ त्वद्वीर्येण सह देवहूत्यां अवतीर्येति शेषः ३२ प्र
त्यकभूतेष्वक्षेषु जायते आविर्भवतीति प्रत्यगक्षजः सरस्वत्या नद्या परिश्रितान् परिवेष्टितान् ३३ अशेषैस्तपोमन्त्रादिसिद्धेश्वरैरभि
ष्टुतः सिद्धमार्गो वैकुंठमार्गो यस्य यद्वा अशेषसिद्धेश्वराभिष्टुतश्चासौ सिद्धैर्मृग्यत इति सिद्धमार्गश्च सः पत्ररथेन्द्रो गरुडस्तस्य पक्षैरुदी

कृत्वा दयां च जीवेषु दत्वाभयमात्मनः मय्यात्मानं सह जगद्द्रक्ष्यस्यात्मनि चापि मां ३१ स चाहं स्वांशकलया त्वद्वीर्येण
महामुने तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्त्वसंहितां ३२ एवं तमनुभाष्याथ भगवान् प्रत्यगक्षजः जगाम बिंदुसरसः सरस्व
त्या परिश्रितात् ३३ निरीक्षतस्तस्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः आकर्णयन्पत्ररथेन्द्रपक्षैरुच्चारि
तस्तोममुदीर्णसाम ३४ अथ संप्रस्थिते शुक्ले कर्दमो भगवानृषिः आस्ते स्म बिंदुसरसि तं कालं प्रतिपालयन् ३५
मनुः स्यन्दनमास्थाय शातकुंभपरिस्कृतं आरोप्य स्वां दुहितरं सभार्यः पर्यटन्म ३६ तस्मिन्सुधन्वन्नहनि भगवान्यत्स
मादिशत् उपायादाश्रमपदं मुनेः शान्तव्रतस्य तत् ३७

र्णमभिव्यक्तं साम आकर्णयन् बृहद्रथन्तरे पक्षौ इति श्रुतेः उच्चारितं स्तोमं च समाधारभूतानामृचां समुदायं शृण्वन् स्तोमं आत्मेति समासते उच्चारितः
स्तोमस्तोत्रीयसमुदायो यस्य साम्न इति ३४ तं कालं परस्वादितं अनुक्तं प्रतीक्षमाणः शातकौंभः सौवर्णः परिकरो यस्मिन्न्तेश्यमास्थाय दुहितरं
चारोप्य वरान्वेषणाय पर्यटन् ३ हे सुधन्वन् विदुर यतः अहः तत्र वेशमात्रेण उपायात् आययौ ३७ श्रीकृष्णाय नमः श्री

यः सकामान्निंद्यमिनिसोहमपि तादृश एवेत्याह यथेति गृहमेधी गृहस्थः तत्र धेनुं त्रिवर्गदोग्ध्रीं भार्यां परिवोढुकामः परं लोतुमिच्छ
न् कामदुघांघ्रियुग्मस्य कल्पद्रुमस्य तव मूलमशेषमुपेयिवान् उपागतोस्मि १५ ननु कामाधर्म्यं अन्यत् किमप्युपास्तो नामतः
अशेषस्य पुरुषार्थस्य मूलमेतदेव ननु तर्हि मुक्तमर्थमेव किं न भजसि अनधिकारादित्याह हे अधीश यः स्वयं प्रजापतिस्तेन
स्ववचसा तंत्या अपकामहतो लोकः पशुवद्बध्यः हे शुक्लधर्ममूर्ते अहं च किल लोकानुगतः अतस्तुभ्यं बलिं हरामि वहामि कर्म
मपीत्वदाज्ञामनुवर्ते अनिमिषाय कालात्मने तदर्थं भार्यां चिच्छामीति चकारस्यार्थः न केवलं लोकानुगततां वहामि किं तु त्वत्प्रेरणा

तथा स चाहं परिवोढुकामः समानशीलां गृहमेधधेनुं उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघांघ्रिपस्य १५ प्र
जापतेस्ते वचसाऽधीश तन्त्या लोकः किलायं कामहतोऽनुबद्धः अहं च लोकानुगतो वहामि बलिं च शुक्लानि
मिषाय तुभ्यं १६ लोकांश्च लोकानुगतान्पशूंश्च हित्वाश्रितास्ते चरणातपत्रं परस्परं त्वद्गुणवादसीधुपीयूष
निर्यापितदेहधर्माः १७ न तेऽजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व षण्नेम्यनन्तच्छदि यत्त्रिणा
भि करालस्रोतो जगदाच्छिद्य धावत् १८

योऽपकरणार्थमिति किरोस्युक्तं १६ अनिमिषायेति कालात्मकात् त्वत्तो भीतः कर्म करोमीत्युक्तं एतद्भूमयं त्वद्भक्तानां नास्ती
त्याह द्वाभ्यां लोकान् कामाभिभूतान् तान् अनुसृतान् पशूंश्च विवेके सत्यपि पुनः कर्मजडान् मादृशान् हित्वा अनादृत्य येत
वच्चरणरूपमातपत्रं श्रितास्तेनेवाह त्वद्गुणानां वादः कथनं तदेव सीधुः संसारविस्मायकत्वात् पीयूषं हृद्यकरत्वात् तेन
निर्यापिता विस्मापिता देहधर्माः क्षुत्पिपासादयो येषामित्युत्तरेणान्वयः १७

अधिष्ठानं यद् दूरं तत्र स्थितं यत्र नाभिहृदे आत्मयोने
अमुख्य हरेर्नाभिहृदं ध्यायेत् कथंभूतं भुवनानां कोशस्य समूहस्य गुहा अधिष्ठानं यद् उदरं तत्र स्थितं यत्र नाभिहृदे आत्मयोनेः
ब्रह्मणो धिषणं धिष्ण्यं अखिललोकात्मकपद्मं व्यूढं उत्थितं तत्तथा हिरन्मणि वृषौ मरकततमणिश्रेष्ठाविव यो स्तनौ तयो द्वयं
ध्यायेत् विशदहाराणां मयूखैर्गौरं श्वेतं २५ ऋषभस्य श्रेष्ठस्य महाविभूतेर्महालक्ष्म्या अधिवासस्थानं वक्षः कंठं च मनसि कु
र्यात् कथंभूतं कंठं कौस्तुभो मणिर्यो भूषणार्थं ध्वतः तस्यापि भूषणमर्थः प्रयोजनं यस्य कौस्तुभमणिमेव स्वयमलंकुर्वन्तमित्य
र्थः पुंसां स्मृत्रणां च मनो नयनानां निर्वृतिमादधानमित्युभयोर्विशेषणं २६ निर्णिक्तानि उज्वलीकृतानि वाहुवलयानि
यस्य तस्य करसरोरुह राजहंसमिव २७ अरातयो ये भटा यो
गद्धा निर्येषु अधिश्रितालोकपालयेषु दश्वतारं चक्रं न सह्यं तेजो यस्य करसरोरुहराजहंसमिव २७ अरातयो ये भटाः

नाभीहृदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मं व्यूहं हरिन्मणिवृषस्तनयोरमुष्य
ध्यायेत् द्वयं विशदहारमयूखगौरं २५ वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानं
कंठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य बाहूंश्च मंदरगिरेः परिवर्तनेन
निर्णिक्तबाहुवलयानधिलोकपालान् संचिंतयेद्दशशतारमसह्यतेजः शंखं च तत्करसरोरुहरा
जहंसं २७ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन मालां मधुव्रतवरूथगि
रोपघुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कंठे २८ भृत्यानुकंपितधियेह गृहीतमूर्तेः संचिंतयेद्भगवतो वद
नारविंदं यद्विस्फुरन्मकरकुंडलवल्गितेन विद्योतितामलकपोलमुदारनासं २९ श्रीः श्रीः श्रीः ॥

धारस्तेषां शोणितमेव कर्दमस्तेन दिग्धां लिप्तां अस्य कंठे मालां मणिं च स्मरेत् मधुव्रतानां वरूथस्य गिरा उपघुष्टां नादितां चै
तन्यस्य जीवस्य तत्त्वं शुद्धं स्वरूपं आत्मानमस्य जगतो निर्लेपगुणात्मकं विभर्त्ति कौस्तुभमणिस्वरूपं भगवान् हरिरिति २८ भृ
त्येष्वनुकंपिता कृतानुकंपा या धीस्तया गृहीता मूर्तिर्येन तस्य विस्फुरती ये मकरकुंडले तयोर्वाल्गितेन प्रचलनेन विद्योतितौ
कामलौ कपोलौ यस्मिन् तत् २९

स्मिन् लब्धं पदं स्थितिर्येन तच्चित्तं विलक्ष्य विशेषेण लक्षीकृत्य एकत्र एकस्मिन्नंग इत्यर्थः २० तत्र क्रमेणाङ्गानि आह संचिंतयेदिति त्रिभिः सम्यक् चिंतयेत् पादतले रेखात्मकानि वज्रादीनि लांछनानि तैराढ्यं युक्तं उत्तुंगा उच्चा रक्ता अवि नखास्तेषां चक्रवालं मंडलं तस्य ज्योत्स्नाभिराहतो महतां ध्यातॄणां हृदयांधकारो येन एतच्च सर्वमुपादाय विशेषणं ध्यायत्वेनैवोच्यते गृह समासात् पत्र गृहगतैकत्वेन विवक्षितं उद्देश्यविशेषणत्वात् प्रभुत्तायजैतेत्यत्रानेकत्वेन विवक्षितं उपादाय विशेषणत्वा त् तथात्राप्युपाय विशेषणत्वात् विशेषणानि वज्रादीति ध्येयत्वेन विवक्षितानीत्यर्थः २१ किंच यस्य शौचेन क्षालनेन निः सृतायाः सरित्प्रवरायाः गंगाया उदकेन तीर्थेन संसारतारकेण मूर्ध्नि अधिकृतेन शिवोपि शिवो भूत् अत्याधिकं सुखरूपे त्यर्थः ध्यातुर्मनसि यः शमलं शैलः पापपर्वतः तस्मिन्निसृष्टं चिन्नं वज्रमिव यत् यद्वा रमलशैलेनीः सृष्टं खलांछनरूपं व

तस्मिन्लब्धपदं चित्तं सर्वावयवसंस्थितं विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः २० संचिंतयेद्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यं उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयांधकारं २१ यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदं २२ जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सुरवंदितया विधातुः ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोरभवस्य कुर्यात् २३ ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ व्यालंबिपीतवरवाससि वर्तमानकांचीकलापपरिरंभि नितंबबिंबं २४

शंये न ततत् २२ विभोर्जानुद्वयं तत्पर्यंतं जंघाद्वयं अखिलस्य विधातुर्ब्रह्मणो जनन्या लक्ष्म्या संलालितं स्पर्शाच्चातुर्येन संसेवितं संसारित्वमिव प्रतीतं वारयति अभवस्येति हृदि कुर्यात् ध्यायेत् २३ सुपर्णस्य भुजयोः संधयोः अधि उपरि ओजस्व ओजसो बलस्य नि धी आधारौ अतसीकायाः कुसुमवत्कांत्या अवभासमानौ व्यालंबि अंगुल्यं लंबमानं पत्पीतं वरं वासस्तस्मिन् वर्तमानो यः कांची कलापः तेन परिरंभः संसक्तिर्यो विद्यते यस्य तद्विभोर्नितंब बिंबं हृदि कुर्यात् इति पूर्वेणान्वयः २४ श्रीकृष्णायनमः श्रीरामजी

श्री०भा०टी०
स० ६८



हतोमानीगर्वोयस्य १२ ऽवलनयज्वलनः तद्यतल्लोलुपं ग्रासनमग्रं यत्रायाविस्मयमालन्य ऽप्रकार्यकरत्वेदृष्टं ततः विप्रमद्भिष्णा
भिचारं कुर्वन्यया १३ ऽततः स्वप्रकाशमध्येचकोणात प्रकाशमानं उदीर्णं उत्कटदीधितीयस्य निशाततनेमि नाभिशितधारेण
दृष्टिंद्वैयथा तादृपस्य पत्रतं उशीतं चिछेद देवाचि निर्जित्य प्रमत्तको लोपं नयता गरुडेनेंद्रप्रयुक्त वज्रस्यामोघस्यमानंदातुं
पिछमेकं त्यत्तं नतयथाइंद्रः चिछेदृष्टि श्येयततयथा स्वप्रकाशतः तद्वत्प्रकाशमानमभिसंबंधः २४ ऽप्रग्रासत्यस्येतिग्रसिः

जग्राहलीलयाप्राप्तांगर ...निवपन्नगी २१ स्वपौरुषेप्रतिहतेहतमानोमहासुरः नेछजदाद्दीयमानां हरिणा
जग्राहलीलयाप्राप्तांगर ...निवपन्नगी २१ स्वपौरुषेप्रतिहतेहतमानोमहासुरः नेछजदाद्दीयमानां हरिणा ...यविप्रायाभिचरन्यथा १३ य
विगतप्रभः २२ जग्राहुर्दसिरवप्रलंज्वलज्वलनलोलुपं यज्ञायधतरूपायविप्रायाभिचरन्यथा १३ य
दोजसादोत्यमहाभद्रं सच चकाग्रादंतः खडदीर्णदीधिति चक्रेणाचिछेदनिशाततनेमीनाहरिर्यथाता र्क्ष्य
पतत्रमुज्झितं २४ वृकेष्वप्रलिवहुधारिणाहरेप्रत्येत्यविस्तीर्णमुरोविभूतिमत् प्रवृद्धरोषः स्वकठोरमुष्टि
नानदन्महत्यांतदधीय ५५५ २५ तेनेथमाहत्वान्तः भगवानादिसूकरः नाकंपमनाकुपिसजाहतद्द्व
द्विपः २६ अथोरुधाऽसृजन्मायां योगमायेश्वरे हरौ ... तामनरे ऽस्योपमेयम २७ प्रववु
र्वायवश्चंडास्तमः पांसवमैरयन् दिग्भ्योनिपेतुर्ग्रावाणः क्षेपणैः प्रहिताइव २८ द्यौर्नष्टभगणाभ्रौघैः
सविद्युत्स्तनयित्नुभिः वर्षद्भिःपूयकेशासृग्विण्मूत्रास्थीनिचासकृत् २९

...ऽपसंयमप्रलयं ... पीमूकृततमञ्चप्रेरितवतः क्षेपणैर्यंत्रैः २९ नष्टोभगणोनक्षत्रसमूहोयस्यां अनेनदेत्यवला
चक्रंतेनवहुधाहृक्रोधिम्रेंसतिं तप्त अभिमुखमागत्यहरेः उरोवक्षःअहृत्य २५ नाकंईषदपिकंपितः २६ अस्यजगत
तिरेकान् व्रसदवन्मुहूर्तामिन ... वनितद्वारागाममसभवात १ ९ ... ६ ... ६

साखगदयातेनहतातिच्युताद्विसतीविघूर्णिताभूत्वाऽपतद्देजेचतद्भगवत्करात्पततं यथातत्पदस्याव्त्पारे जरत्पन[illegible]धा
ततदैत्यस्यपौरुषंरेजेति ३ लब्धतीर्थः लब्धावसरः सस्वचवधेप्रानबाधेनप्राहरत् ४ समानयनवभूवेतिवाक्यभेदात्सइत्यस्या
येनहतंव्यग्रसमंभ्रमचक्रंयस्यविषज्जमानंविनिघे रासंगंप्राप्नुवतंप्रतिअतद्विदो तस्यभावमजातंता आसमंता[illegible]स द
सदैत्यः तमात्तचक्रंनिरायुधं दृष्ट्वा अग्रतोव्यवस्थितंचविलोक्य आर्षेणक्रोधेनपरिप्लुतानिक्षुभितानीन्द्रियाणि यस्यसः आहे

साहतागदपातेनविच्युता[illegible] [illegible] विघूर्णि[illegible]पत[illegible]नमिवाभवत् ३ सतदालब्धतीर्थोपिनववा
[illegible]निरायुधं मानयत्सम[illegible] [illegible] [illegible] [illegible]चनिर्गते मानयामास
धर्मे सुनाभं चासुरविभुः ५ तंव्यग्रचक्रंदितिपुत्रा[illegible]कत्र[illegible]स्यमुखेनविषज्जमानं चित्रावाचो तद्विदो खेचराणां
तत्रस्मासन्स्वस्वतेमुंजहीते ६ सतेनिरायुधमातरणांगमग्रतोव्यवस्थितं पद्मपलाशलोचनं विलोक्यचामर्षप
रिप्लुतेंद्रियोरुषास्वदंतच्छदमादशन्श्वसन् ७ करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणोदहन्निव अभिद्रुत्यास्वगद
याहतोसीत्यहनद्धरिं ८ पदासव्येनतां साधो भगवान्यज्ञसूकरः लीलयामिषतः शत्रोः प्राहरद्वातरंहसं ९
आहचायुधमादायघटस्वत्वंजिगीषसि इत्युक्तः सतयाभूपस्ताडयित्वाजदद्भिं आपतंतींसतीवीक्ष्यभगवा
न्समवस्थितः १०

शातदृष्ट्वान् ७ चक्षुर्भ्यां दहन्निवसंचक्षाणः पश्यन्नइवेतिवस्तुतः क्रोधभावमाह हतोसिज्ञातोसीतिवास्वबोध्यः ८ वात
रंसहंवायुवेगं ९ घटस्वउद्यमंकुरुयतस्त्वंजेतुमिच्छसि १० हतोमनोगर्वोयस्य ११ श्रीरामकृष्णायनमः श्रीराज्ञीसहायः

सप्ताऽदयित्वाहत्वेत्यर्थः पुष्करविष्टराद्भिः ब्रह्मादि
अखिलयज्ञानां तंतवे विस्तरकायेतिवा अरुंतुदः मर्मभेदी ३० सप्ताऽदयित्वा हत्वेत्यर्थः हे सुमित्र शौनक यथा येन प्रकारेण ३२ कथाउ
भिसंस्तुतः ३२ यथानूक्तं गुरुक्तिमनतिक्रम्य मया अवादि तव कथीतं

एतौ द्वौ पार्षदौ अवस्पृश्य पाद्यात् तावसकृतिं पुनः कतिपयैः स्थानं प्रपत्स्येते रजन्मभिः २९ देवा ऊचुः॥ नमो नम
स्ते खिलयज्ञतंतवे स्थितौ गृहीतामलसत्त्वमूर्तये दिष्ट्या हतोऽयं जगतामरुंतुदस्त्वत्पादभक्त्या वयमीश निर्वृ
र्वृताः ३० मैत्रेय उवाच॥ एवं हिरण्याक्षमसह्यविक्रमं सप्तादयित्वा हरिरादिसूकरः जगाम लोकं स्वमखं
डितोत्सवं समीडितः पुष्करविष्टरादिभिः ३१ श्रीशुक उवाच इति कौषारवाख्याता माकर्ण्य भगवत्कथा क्षत्ता
नंदं परं लेभे महाभागवतो द्विजः ३२ सूत उवाच॥ मया यथानूक्तमवादि तो हरेः कृतावतारस्य सुमित्र चेष्टि
तं यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः ३३ अन्येषां पुण्यश्लोकानामुद्दामयशसां
तां उपश्रुत्य भवेन्मोदः श्रीवत्साङ्कस्य किं पुनः ३४ यो गजेंद्रं झषग्रस्तं ध्यायंतं चरणाम्बुजं क्रोशंतीनां करेणू
नां कृच्छ्रतोऽमोचयद्द्रुतं ३५ तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः कृतज्ञः को नु सेवेत दुराराध्यमसाधुभिः ३६।

तथा तत्कथाश्रवणे कस्यानंदो न स्यादित्याह इ
पश्रुत्येहे द्विजश्रौनक भक्तिमात्रेण पशूनामपि सुलभः अन्यथा देवानामपि दुर्लभ इति ३४ तथा तत्कथाश्रवणे कस्यानंदो न स्यादित्याह
ति द्वाभ्यां झषो ग्राहः क्रोशंतीनां करेणूनां करुणया त्वरया ३५ करेणुप्रधिविमुहराद्दिना सूकररूपस्य एतद्धरेश्चरितं
३६

नानायुधानि मुंचंतीति तथा यातुधान्यश्च पुनरदृश्यंत: २० हिंस्रा छिंधि भिंधीत्येवंभूता: अतिवैशसा: अत्युग्रा वाच: उत्सृष्टे
त्यत्रैव वाक्यसमाप्ति: २१ प्रादु:कृतानामिति प्रकटितमायानां विनाशयदिति यत्प्रयुक्तौ च षष्ठी। प्रियात् त्रीणि सवनानि पादा यस्य
यज्ञमूर्त्तिरित्यर्थ: त्रयोदस्य पादा दीर्घशीर्षे ति श्रुते २२ भर्त्तुरादेशं त्वत्पुत्रौ भगवान् हनिष्यतीत्येवंभूतं २३ उपगूहमानो बाहो
रंतर्निधाय संपद्दयन् २४ अहन् जघान त्वाष्ट्रं वृत्रं मरुत्पतिरिंद्र २५ परितो भ्रमन् गात्रं यस्य उदस्ते उद्वर्त्तिते लो

गिरय: प्रत्यदृश्यंत नानायुधमुचोनघ दिग्वाससो यातुधान्य: शूलिन्यो मुक्तमूर्द्धजा: २० वहुभिर्यक्षरक्षोभि:
पत्यश्वरथकुंजरै: आततायिभिरुत्सृष्टा [illegible] हिंस्रा वाचोऽतिवैशसा: २१ प्रादु:कृतानां मायानां आसुरीणां विनाशय
न् सुदर्शनास्त्रं भगवान् प्रायुंक्त दयितं त्रिपात् २२ तदा दिते: समभवत्सहसा हृदि वेपथु: स्मरंत्या भर्त्तुरा
देशं स्तनाच्चासृक् प्रसुस्रुवे २३ विनष्टासु स्वमायासु भूयश्चाव्रज्य केशवं रुषोपगूहमानोऽमुं ददृशेऽवस्थि व
तं बहि: २४ तं मुष्टिभिर्विनिघ्नंतं वज्रसारैरधोक्षज: करेण कर्णमूलेऽहन् यथा त्वाष्ट्रं मरुत्पति:
२५ स आहतो विश्वजिता ह्यवज्ञया परिभ्रमद्गात्र उदस्तलोचन: विशीर्णबाह्वंघ्रिशिरोरुहोऽपतद्यथा नगेंद्रो
लुलितो नभस्वता २६ क्षितौ शयानं तमकुंठवर्च्चसं करालदंष्ट्रं परिदष्टदच्छदं अजादयो वीक्ष्य शशंसुरागता
अहो इमं को नु लभेत संस्थितिं २७ यं योगिनो योगसमाधिना रहो ध्यायंति लिंगादसतो मुमुक्षया तस्यैव दैत्याधि
पति: पदाहतो मुखं प्रपश्यंस्तनुमुत्ससर्ज ह २८

चने यस्य विशीर्णा बाह्वादयो यस्य नगेंद्रो महाद्रुम: लुलित उन्मीलित: रुग्णो नभस्वता वायुना २६ संस्थितिं मृत्युं २७ असत:
आरोपितात् लिंगशरीरात् मोक्तुमिच्छया वराहस्य एवं पादयोरेव करत्वात् करेणाऽहन् इति पादाहत इति विरुद्धं २८ ॥

एवमितिव्यासवाक्यं उग्रश्रवाः रोमहर्षणपुत्रः नैमिषमयनमाश्रयो येषां अर्पितमध्यात्मामनो येन ७ गोरुद्धरणं च लीलां
हिरण्याक्षं चावज्ञयाहतं निशम्य भारतो विदुरः ८ यस्मात्त्वमव्यक्तमार्गवित् ब्रह्मणो वा विशेषणं ९ एतच्च जगत् अ
भावयन् उत्पादयामासुः १० सद्वितीयाः सभार्याः स्वतंत्रा भार्यानपेक्षा कर्म्मसु प्रजासर्गादिषु संहताः परस्परापेक्षा इद
जगत् ११ ब्रह्मा किमारभं तिप्रति प्रश्नस्य यज्ञादीनसृष्टवान् इत्युत्तरं वक्तुं पूर्वोक्तां सृष्टिमनुस्मारयति दैवेनेति सत्व

श्रीव्यासउवाच॥ एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः भगवत्यर्पिताऽध्यात्मः तानाह श्रूयतामिति
७॥ सूतउवाच॥ हरेर्धृतक्रोडतनोः स्वमायया निशम्य गोरुद्धरणं रसातलात् लीलां हिरण्याक्षमवज्ञ
याहतं संजातहर्षो मुनिमाह भारतः ८ विदुरउवाच॥ प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् किमा
रभत मे ब्रह्मन् प्रब्रूह्यव्यक्तमार्गवित् ९ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः ते वै ब्राह्मण आदेशा
त्कथमेतदभावयन् १० सद्वितीयाः किमसृजन् स्वतंत्रा उत कर्मसु आहोस्वित्संहताः सर्व्व इदं स्म समकल्प
यन् ११ मैत्रेयउवाच॥ दैवेन दुर्वितर्क्येण परेणानिमिषेण च जातक्षोभाद्भगवतो महानासीद्गुणत्रयात्
१२ रजःप्रधानान्महतस्त्रिलिंगो दैवचो[illegible]दितात् जातः ससर्ज भूतादिर्वियदादीनि पंचशः १३ श्रीकृष्णा

भिः मन्वादिब्रह्मानां तु तराध्यायमारभ्योत्तरं भविष्यति दुर्वितर्क्येण दैवेन जीवादृष्टेनापरेण प्रकृत्यधिष्ठात्रा महापुरुषेण
अनिमिषेण कालेन च हेतुना भगवतो निर्विकारात् जातक्षोभं यद्गुणत्रयं प्रधानं तस्मान्महानासीत् तदुक्तं तंत्रे विष्णोस्तु
त्रीणि रूपाणीति १२ महतो जातो भूतानि भूतादिरहंकारः त्रिलिंगः त्रिगुणः रजःप्रधानादिति स्वतः सत्वप्रधानस्यापि मह
तोऽहंकारोत्पत्तिकाले कार्य्यानुरूपरजःप्रधानं भवतीति भावः पंचतन्मात्राणि ततस्तद्द्वारा तान्यपि पंच पंच ससर्जेत्यर्थः १३

मृ एव तामत्तेश्री नारायणेगतिर्भवति ३७ महापुण्यं स्वर्गादिप्रदं अत्यलंपवित्रं प्रतिषणेये धन्यंकं धन्यं च नावदं यशस्यं कीर्तिक
रं आयुष्यं आशिषां परस्थानं परि ज्ञानां वा प्राणानां मिन्द्रियाणां च परं अंगदे विदुर ३८ इतितृतीये टीकोनविंशो ध्यायः १९
अथायं अथ स्थाने प्रतिज्ञायाः परमेश्वराय नमः प्रतिष्ठां स्वायंभुवस्य मनोः १ प्रतिष्ठा स्थान अध्यास्य प्राप्य सोनेस्नन्त
विंशे वराहजन्मादि अवधानादर्थादितेः सर्गों न्यूनता अतोर्यं तेवक्तुं अन्वयंप्रस्तुतं मनोः २ प्रति ष्ठा स्थान अध्यास्य प्राप्य सोनेस्नृत
स्य योमहर्षणस्य पुत्रः अवरं अर्वाचीनं जन्मयेषां ईश्वरेली नानाभागीय निर्गमाय कानि द्वाराणि कृतवान् अर्वाचीनान् प्रतिष्ठि

यो वै हिरण्याक्षवधं महद्भुतं विक्रीडितं कारणा............दः शृणोति गायत्यनुमोदते ञ्जसा विमुच्यते ब्रह्मवधादपी
हमो ३७ एतन्महापुण्यतमं पवित्रं धन्यं यशस्यं पदमायुराशिषां प्राणानां युधि धैर्यवर्द्धनं वाणोत्तेगति
रेग मृत्नरावता ३८ इति श्रीभागवते महापुराणे तृतीयस्कंधे एकोनविंशोध्यायः ॥१९॥ शौनक उवाच ॥ म
हीं प्रतिष्ठामध्यास्य सौते स्वायंभुवो मनुः कान्यन्वतिष्ठद्द्वाराणि मार्गायावरजन्मना १ क्षत्ता महाभागवतः कृ
ष्णस्यैकान्तिकसुहृत् यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति २ द्वैपायनादनवरो महित्वे तस्य देहजः
सर्वात्मनाश्रितः कृष्णं तत्पराञ्श्चाप्यनुव्रतः ३ किमन्वपृच्छन्मैत्रेयं विरजास्तीर्थसेवया उपगम्य कुशावर्त
आसीनं तत्त्वविन्तमम् ४ तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः आपो गङ्गा इवाघघ्नीर्हरेः पादाम्बुजाश्र
याः ५ ता नः कीर्तय भद्रं ते कीर्तन्योदारकर्मणः रसज्ञः को नु तृप्येत हरिलीलामृतं पिबन् ६ श्रीराम

नः के रूपायैः अपृष्टवानीत्यर्थः विदुरमैत्रेयसंवादे नैव तत् नास्यत इति तमेव संवादं प्रष्टुमाह क्षत्तेति पंचभिः श्रीकृष्णसुहृत्वे
हेतुः दुर्योधनादिभिरपत्यैः सह मग्रजं धृतराष्ट्रं अघवान् कृतापराध इति हेतोः श्रीकृष्णोक्तमंत्र अनादरात् यस्तत्याज २
अवरजः अनवरः अन्यूनः महित्वे महिम्नि ३ कुशावर्ते गंगाद्वारे ४ यत्किमपृच्छत् तत्किं तद्वेति चेत्तत्राह तयोरिति अघ

श्री०भा०त०टी०

७१

३)

०प्रन्नो न्यं श्लेषया उपमर्द्दने हेतुना उत्तुंगौ निरंतरौ पयोधरौ यस्याः सुन्दरौ द्विजौ सुदंतौ स्निग्धहासो विलोकनं च यस्याः ३० गूहं
ती वस्त्रांचलेन [illegible] नीलानामलकानां वरूथस्तोमो विद्यते यस्याः हे धर्म्म विदूर तां स्त्रियमुपलभ्य मत्वा ३१ समूढो ना
विभावना क्रमममाह अहो इति ३२ अभिसंभाव्य सकृष्ममिश्रं भात कवुद्धयन्तीं तामपृच्छत् ३३ कासीति त्रिभिः कासि जात्या क
स्यवकन्या हे भामिनि कोपने रूपमेव द्रविणं अन्तर्वित्तं ते देववरापेक्षया हं तेन तदसंमर्पणेन विवाधसे ३४ किं जाति कुल
दिश्रक्षिनयावा काचिन्नवसि दृष्टाइदं तावन्न दृजातं यत्त्वदत्रोन किंतु केवलनो मनः उत्तुनोषि विमथ्नासि ३५ त्वं भित्त

अन्योन्याश्लेषयोस्तुंगनिरंतरपयोधरां सुनासां सुद्विजां स्निग्धहासलीलाविलोकिनीं ३० गूहंतीं व्रीडया आत्मानं नी
लालकवरूथिनीं उपलभ्यासुधर्म सर्वे संमुमुहुः स्त्रियं ३१ अहो रूपमहो धैर्यं महो अस्या नवं वयः मध्ये
कामयमानानामकामेव विसर्प्पति ३२ वितर्कयंतो बहुधा तां संध्याप्रमदां यतः अभिसंभाव्य विश्रंभात् पर्य
पृच्छन्कुमेधसः ३३ कासि कस्यासि रंभोरु को वार्थस्ते त्र भामिनी रूपद्रविणपण्येन दुर्भगान्नो विवा
धसे ३४ या वा कस्यास्त्वमबले दृष्ट्वा संदर्शनं [illegible] उत्तुनोषीक्षमाणानां कंदुकक्रीडया मनः ३५ नैक
त्र ते जयति शालिनि पादपद्मं घ्नन्त्या मुहुः करतलेन पतत्पतंगम् मध्यं विषीदति बृहत्स्तनभारभीतं शांतेव दृष्टि
रमला सुशिखा समूहः ३६

[illegible] ज्जितानावान्वयं हे शालिनि श्लाघ्ये एकत्र न जयति न स्थिरी भवति यद्वा अनेकत्र अनेकगतिविलासेषु जयति सर्वोत्कर्षेणाव
त्तंते पतत्पतंगं उच्चलंतं कंदुकं घ्नत्याः स्तनयोर्भाराद्भीतं तत्त्वकृशं मध्यं विषीदति शाम्यति शांतामयरेवप्रसरति सशिखा समूह
शोभन केशभारः कलापोस्मिन्पाठांतरे सुशिखाः शोभना केशांत विशीर्यमाणात् समूहस्य वधाने तिअन्न च अस्तंगछंन स्य
एव पतत्पंगः मेघविच्छेदो मध्यमविभागः तारकरूपां दृष्टिः तम एव केशाः इत्यूह्या ३६ श्रीकृष्णायनमः श्रीरामजी

मौक्तिकं हेममंडमेकैकशः प्रत्येकं स्रष्टुमसमर्थानि संति सहत्य सममृजुः २४ अन्ववात्सीत् अधिष्ठितवान् २५ सहस्राकारा अभितो रुद्दीधितिर्यस्य तत् सर्वजीवनिकायानां मोकस्थानं यस्य स्वराट् ब्रह्मा २६ यः सलिलाशये गर्भोदके स्पाते शेते तेन भगवतानुविष्टो धिष्ठितः स स्वराट् स्वया संस्थया नामरूपादिक्रमेण २७ छायाभ्रमा इतियोगिनीतयाबुध्वावित्पथैः यत्त्वबुद्धिस्तत्प्रभोरित्युक्तत्वात् महातम इति महामोहः स्वरूपनिर्देशमात्रविवक्षयामोह इति प्रथमाप्रयोगः २८ तामेव प्रथ

१५ ४२९

मूलम्

तानि वैकैकशः स्रष्टुमसमर्थानि मौक्तिकं संहत्य दैवयोगेन हैममंडमवासृजत् २४ सोऽत्राधिष्ठाय सलिलस्थां डकोशो निरात्मकः साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः २५ तस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधितिः सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् २६ सोनुविष्टो भगवता यः शेते सलिलाशये लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया २७ ससर्ज छायया विद्यां पंचपर्वाणमग्रतः तामिस्रमंधतामिस्रं तमो मोहो महत्तमः २८ विससर्जात्मनः कायं नाभिनंदंस्तमोमयं जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवां २९ क्षीएम:

मोक्तां साधारणीं सृष्टिमनूद्य केनचिद्विशेषेणासाधारणीं सृष्टिमाह विससर्जेत्यादिना यावत्समाप्तिः तद्विसृष्टं कायं रात्रिरूपं तत एव जातानि यक्षरक्षांसि जगृहुः क्षुत्तृषोः समुद्भवो यस्यां तां अत्र च यास्य तनूरासीत् सा तामिस्रो ऽभवदित्यादि श्रुतिरनुसंधेया २९

आत्मना आत्मसंप्रतिबिंबं आत्मना आत्मनो मनः प्रतिबिंबदर्शिनः सुंदरस्य शिरः कंपादिचेष्टा तत एव सृष्टानां मिथःसंमानेन नित्यं मिथुनीभवः
तत्प्रतिबिंबरूपं कर्मभेत्तसरःक्रमानुवर्तिनः भोगःप्रभागो विस्तारः पापादिप्रसरणावता देहेन ४६ अक्षुचितेन कृष्टिप्रयासे तत भो
गक्षुधादियुक्तो अमृतः प्रभुस्तस्मात् ये केशाः प्रहीयंतः अच्युताः ते अप्रहयो जाताः अमर्षितः परोधः कुंचने प्रचलन्तो मुष्मात् ते सर्पाः।
अत एव अनंगत्वं भवंतिहति नागाः अवेगवंतः इत्यर्थः भोगवंतो जाताः भोगेन फणेन उरुविस्तीर्णा स्कंधा येषां सर्वचिते क्रोधयाम
न क्रूरास्तेषां आद्यानां नरजातिभेदाः सर्पा सिद्धांते प्रसिद्धाः ४८ यदात्मन्यापानो भूततदा मनवःसृज्यंते मनःस्वीयं पुरुषाकार पुरैरे

मानयन्नात्मनात्मानमात्माभासं विलोकयन् । तेनुसंजग्रह रूपं त्यक्तं यत्परमेष्ठिना ४६ मिथुनीभूय गायंति तमेवोषसि
कर्मभिः । देहेन वै भोगवताऽऽश्याना वकुचिंतया ४७ सर्गमनुपचितं क्रोधादुत्ससर्ज हतं वपुः । येभ्यो यंताः सुतः केशा अ
हयस्तेंगजज्ञिरे ४८ सर्पाः प्रसर्पतः क्रूरा नागा भोगोरुकंधराः । स आत्मानं मन्यमानो कृतकृत्यमिवात्मभूः ४९
तदा मनून् ससर्जांते मनसा लोकभावनान् । तेभ्यः सोऽस्राक्षीत् स्वं देहं पुरुषं पुरुषमानान् ५० तान्दृष्ट्वा ये पुरा सृष्टा अप्र
शंसन् प्रजापतिं [illegible] ५१ [illegible] क्रिया यस्मिन्नु साकल्ये [illegible] मद्दामहे त
पसा विद्यया युक्तो योगेन च सु समाधिना आत [illegible] प्रियाः प्रजाः ५३

अभ्यसृजत् ददौ ५० तान्मनून् ते त्वया कृतं सुष्ठु [illegible] यस्मिन् मनुसर्गे क्रियाः अग्निहोत्राद्याः अतोऽस्मिन् रूपे सर्वे साकं स
ह अन्नं हविर्भागादिकं अदामहे भक्षयामः हे ब्रह्मन् ५१ कर्मसु [illegible] तपसेति विद्या उपासना योगः आस
नादि सुसमाधिवैराग्यैश्वर्यादियुक्तः समाधिस्तेन च युक्तः [illegible] सव सैद्धि यमेन ऋषिः ब्रह्मा ऋषी [illegible] सस्रजे

यचंतीं स्त्रियंमत्वा [illegible] त्मानमात्मनाजिघ्रंत्यासौंदर्येण प्रसन्नात्मातद्घ्राणंचसौंदर्यानुभावंस्वात्मदर्शी
प्रमदेवकृहे मूर्मंडे मेकेक [illegible] गृह्यः ३७ प्रह [illegible] विश्वावसुपुरोगमो मूर्खोयेषु ३८ प्राप्तनसांदृशा प्राप्तस्पेनात्मा
काः ३८ ज्योत्स्नाचंद्रिकारूपांतरंवगंधर्वीदिग्गणाः विश्वावसुः ३९ [illegible] योपयानांमिंद्रं प्रचक्षते ४१ येन इंद्रियाविते देनेदेन
विमृक्तकेपान्वीक्ष्यने त्रेतिमीलितवान् ४० इंद्रियाणांविक्लेदः [illegible] योपयानांमिंद्रं प्रचक्षते तंद्राजं कानिद्रोन्मादहेतुत्वेन भूतादि
नाउच्छिष्टान् धर्मंचसर्वतः धर्षयंती भ्रांतान्कुर्वंति तेभूतादिगणाः उन्मादः प्रचक्षते

[illegible] गृह्य त्वामूढधियः स्त्रियं ३७ प्रहस्यभावगंभीरंजिघ्रंत्यात्मानमात्म
इतिसायंतनींसंध्यामसुराःप्रमदाय प्रलोभ [illegible] विससर्जतनुंतांवैज्योत्स्नांकांतिमतींप्रियां तएवचाददुःप्रीत्या वि
ना कांत्याससर्जभगवान्गंधर्वा सांगणा [illegible]
श्वावसुपुरोगमाः ३९ स स्वप्नभूतापत्या [illegible] त्मतंद्रिणा दिग्वाससोमुक्तकेशान्वीक्ष्यचामीलयद्दृशौ ४० ज
गृहुस्तद्विसृष्टांतांजृंभणाख्यांतनुंप्रभोः निद्रामिंद्रियविक्लेदोययाभूतेषुदृश्यते ४१ येनोच्छिष्टान्धर्षयंतीतमुन्मादंप्र
चक्षते ऊर्जस्वंतंमन्यमान आत्मानंभगवानजः ४२ साध्यान्पितृगणान्न्यास्परोक्षेणासृजत्प्रभुः तआत्मसंभ
र्गंतंकायंपितरःप्रतिपेदिरे ४३ साध्येभ्यश्चपितृभ्यश्चकवयोयद्वितन्वते सिद्धान्विद्याधरांश्चैवतिरोधानेनसोसृ
जत् ४४ तेभ्योददात्तमात्मानमंतर्धानाख्यमद्भुतं सकिंनरान्किंपुरुषान्प्रत्यात्म्येनासृजत्प्रभुः ४५ श्री

नांचचातुर्विध्यमुक्तं ऊर्जस्वंतंबलवंतंअन्नवंतंवा ४२ परोक्षेणहृत्स्वरूपेण आत्मनःसर्गोयस्मात्तं ४३ यत्तयेनवायेन
संप्रदानत्वनिमित्तेनचकवयः कर्मकोविदाःसाध्येभ्यःपितृभ्यःस्वपितृस्वरूपेभ्यवितन्वते श्रद्धादिनाहव्यंकव्यंददातितिरो
॥ ॥ ॥ धानेनहृत्स्वरूपत्वेसव्यप्यंतर्धानत्वाख्या ४४ प्रत्यात्म्येनप्रतिबिंबेन ४५ ॥ ॥ ॥

सकर्दमस्तं खेऽवस्थितं दृष्ट्वा मूर्ध्ना क्षितावपतत् गीर्भिस्त्वभ्यगृणात् इति चतुर्णामन्वयः पद्मोत्पले दिनरात्रिविकसितानां प
द्मानां मेतु उत्पलानां च स्रक् यस्य तं स्निग्धा नीलाश्चये अलकास्तेषां व्रातो वक्त्राब्जे यस्य ९ श्वेतोत्पलं क्रीडनं यस्य म
नःस्पर्शी मनस्यानंदजनकं स्मितमीक्षणं यस्य १० वक्षसि श्रीर्यस्य कौस्तुभकंधरायां यस्य ११ प्रीतिरेव स्वभावः स्वतःसि
द्धो धर्मो यस्य १२ त्वामृते परमानंदं धिगन्यवरकामुकं अथापि कृपणां मानुग्रहाणां वरदा ततः वृणेति हर्षेहे ईड्य नोऽस्म

सतं विरजकर्माभं सितपद्मोत्पलस्रजं स्निग्धनीलालकव्रातःवक्त्राब्जं विरजांबरं ९ किरीटिनं कु
ण्डलिनं शंखचक्रगदाधरं श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणं १० विन्यस्तचरणांभोजमं
सदेशे गरुत्मतः दृष्ट्वा खेऽवस्थितं वक्षःश्रियं कौस्तुभकंधरं ११ जातहर्षोऽपतन्मूर्ध्ना क्षितौ लब्धमनो
रथः गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्मकृतांजलिः १२ कर्दम उवाच ॥ जुष्टं बताद्याखिलसत्त्वराशेः
सं[illegible]द्ध्यमक्ष्णोस्तव दर्शनान्नः यद्दर्शनं जन्मभिरीड्य सद्भि[illegible]ते योगिनो योगरूढाः १३ ये मायया ते
हत[illegible]धसस्त्वत्पा[illegible]दं भवसिंधुपो[illegible]सते क[illegible]शं ददासि कामान्निरयेऽपि ते स्युः १४ ।

हे [illegible]नि धेस्तव दर्शनात् अधाद्यो [illegible]सिध्यसा पैत्मं जुष्टं सेवितं त्वद्दर्शनमेव महत्स्पूलमिन्नुपयाद यतियस्मात्
भिः सम[illegible] तरो त्वरमायाद्धित प्रकर्षैर्जन्मभिरूढो धिरूढो योगो यैस्तेपि १३ तं मा भक्तान् विगर्हयन्नाह य इति हे ई
वतर्शनं स[illegible] [illegible]सु: तेषां कामान्नात्नवांय तेन[illegible]नहेतुधयतोव उपासते त्वंतु तेषां तान् कामान् अपि निरयेऽसि ददा
[illegible]तेदि[illegible]दैर्हे [illegible] सि ॥१४॥



३३

राम

तयोगर्द्धिश्च तपश्च विद्या च विरक्तिश्च विद्यन्ते यस्मिन् ... ५४ ॥

कितरेहं यस्यां समदादित्यत आह यदिति समाधिस्वऐश्वर्यं च योगर्द्धिश्च ... विद्यातो बितेन तु विष्णुना कर्दमस्य मनोः पुत्र्याविवाहघटनोच्यते १ धर्मं महीं च ... ध्यायः ॥ एकविंशतयो विद्यातो ... २ योगलक्षणैर्यमादिभिः युक्तायां कतिधा वीर्यं ससर्ज कति पुत्रानुत्पादया सित्यर्थः मनोः ... तुः तन्मे वदेति तृतीयेनान्वयः ... नससर्ज तच्च वदेति चकारस्यार्थः ५ सहस्राणां समाः दश सहस्राणि ... न्यामाकूतिं च भार्यां लब्ध्वा ... मेरुकर्वेति ... उन्मा ... ८

[illegible] ... ईशः ... वरक्तिमत ५४ इतिश्रीभागवते महापुराणे तृतीयस्कंधे ... एकविंशतितमोऽध्यायः ॥ ... ॥ स्वायंभुवस्य च मनोर्वंशः परमसंमतः कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः १ प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै यथाधर्मं जुगुपतुः सप्तद्वीपवतीं महीं २ तस्य वै दुहिता ब्रह्मन्देवहूतीति विश्रुता पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ ३ तस्यां स वै महायोगी युक्तायां योगलक्षणैः ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद ४ रुचिर्यो भगवान्ब्रह्मन्दक्षो वा ब्रह्मणः सुतः यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीं ५ मैत्रेय उवाच ॥ प्रजाः सृजेति भगवान्कर्दमो ब्रह्मणोदितः सरस्वत्यां तपस्तेपे सहस्राणां समा दश ६ ततः समाधियुक्तेन क्रियायोगेन कर्दमः संप्रपेदे हरिं भक्त्या प्रपन्नवरदं सुखं ७ ततः प्रसन्नो भगवान्पुष्कराक्षः कृते युगे दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ८

संवत्सराणीत्यर्थः ६ ततस्तस्मिन् तपसि क्रियायोगेन पूजाप्रकारेण संप्रपेदे सिषेवे प्रपन्नेभ्यो भक्तेभ्यो वरदातारं ७ शाब्दं केवलं वेद्यं ब्रह्म तन्मयं वपुर्दधत् तं प्रत्यात्मानं दर्शयामास ८ श्रीकृष्णाय नमः परमात्मने श्रीरस्तु श्रीमस्तु

उग्रे युक्ते योगो यस्य तेन वपुषा विद्योतमानं ४६ तस्य भगवतो व्याहृतं भाषणमेव अमृतकला अमृतमयस्य चंद्रस्य कला तन्मयं पीयूषं तस्य श्रवणेन च नातिक्षामं तपसा कृशं संतमप्यकृशं प्रांशुमुन्नतं ४७ उपसंसृत्य समीपं गत्वा मलिनं देहदर्शनात् पूर्ववैवक्रियाः अर्हितः योनेत्यर्हणं महार्हत्वं ततं असंस्कृतं अनिर्निक्तं यथा मलिनं नृपते गृहं तु उटजं पर्णशालां प्राप्तः पुनः पादसमीपे प्रणतं ४८ अग्नीभिरतिनिर्देश्य सपर्यया पूजया प्रत्यगृह्णात् सत्कृतवान् ५० तेच चंक्रमणं पर्यटनं यस्मात् ५१ मनुस्त्वं विष्णुप्रणमति यदिति स्थानेन तत्काला

विद्योतमानं वपुषा तपस्युग्रयुजा चिरं नातिक्षामं भगवतः स्निग्धापांगावलोकनात् ४६ तद्व्याहृतामृतकलापीयूषश्रवणेन च प्रांशुं पद्मपलाशाक्षं जटिलं चीरवाससं ४७ उपसंसृत्य मलिनं यथार्हणमसंस्कृतं अथोटजमुपायातं नृदेवं प्रणतं पुरः ४८ सपर्यया पर्यगृह्णात् प्रतिनंद्यानुरूपया ४९ ग्रहीतार्हणमासीनं संयतं प्रीणयन्मुनिः स्मरन् भगवदादेशमित्याह श्लक्ष्णया गिरा ५० कर्दम उवाच ॥ नूनं चंक्रमणं देव सतां संरक्षणाय ते वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालिनी [illegible] योऽर्केन्दग्नींद्रवायूनां यमधर्मप्रचेतसां रूपाणि स्थान आधत्से तस्मै शुक्लाय ते नमः ५२ न यदा रथमास्थाय जैत्रं मणिगणार्पितं विस्फूर्यच्चंडकोदंडो रथेन त्रासयन्नघान् ५३ स्वसैन्यचरणक्षुण्णं वेपयन्मंडलं भुवः विकर्षन्बृहतीं सेनां पर्यटस्यंशुमानिव ५४ श्रीकृष्णाय नमः

वसरे शुक्लाय विष्णवे ५२ न यदेति यच्चामन्वयः यद्यपि धर्मरक्षार्थं सर्वतः पर्यटतस्तव संगाद् यागमनं संभवति तथापि विशेषकार्यं चिदस्ति तत्कथ्यतामिति जैत्रं जययुक्तं मणिगणार्पितं यस्मिन् तं रथमारुह्य त्वं पदानुवेपमंडलं न पर्यटयसि तत्... मेतवोजि घेरनइति त्रयेणान्वयः विस्फूर्जितां कुर्वन् चंडं कोदंडं [...] ५५ श्रीकृष्णाय नमः श्रीरामाय नमः

परमानंदआस्नुतिदर्शयितुं आश्रमं वर्णयति यस्मिन्नित्यादि सप्तभिः प्रपन्ने कर्दमे ३८ शिवमारोग्यं अमृतत्वाद् जलं यस्मिन् ३९ कूज... पुण्यामृगद्विजा येषु तैः पुण्यद्रुमलताजालैः समूहैर्युक्तं ४० घुष्टं नादितं मत्तभ्रमराणां विभ्रमोऽपि नो दो यस्मिन् मत्तबर्हिणां एव नटास्तेषां आटोपो नत्यसंभ्रमो यस्मिन् आह्वयंतः मिथो मत्ताः कोकिला यस्मिन् ४१ कदंबादिभिश्चूतैरलंकृतं ४२ कारंडवादिभिः वल्गु यथा तथा

यस्मिन् भगवतो नेत्रान्न्यपतन्नश्रुबिंदवः कृपयासंपरीतस्य प्रपन्नेऽर्पितया भृशं ३८ तद्वै बिंदुसरो नाम सरस्वत्या परिप्लुतं पुण्यं शिवामृतजलं महर्षिगणसेवितं ३९ पुण्यद्रुमलताजालैः कूजत्पुण्यमृगद्विजैः सर्वर्तुफलपुष्पाढ्यं वनराजिश्रियान्वितं ४० मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमं मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलं ४१ कदंबचंपकाशोककरंजबकुलासनैः कुंदमंदारकुटजैश्चूतपोतैरलंकृतं ४२ कारंडवैः प्लवैर्हंसैः कुररैर्जलकुक्कुटैः सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितं ४३ तथैव हरिणैः क्रोडैः श्वाविद्गवयकुंजरैः गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतं ४४ सप्रविश्यतीर्थवरमादिराजः सहात्मजः ददर्श मुनिमासीनं तस्मिन् हुतहुताशनं ४५ श्रीकृष्णाय नमः रामाय नमः

कूजितं हरिणादिभिर्वृतं तत्र क्रोडः शूकरः श्वावित् शल्लवः मर्को मर्कटः तद्विषाः गोपुच्छाः हरिर्वानरः सिंहो वा नाभिः कस्तूरीमृगाः ४४ हुतो हुतोऽग्निर्नो ब्रह्मचारियोग्यो येन ४५

रिरद्भुषेः क्षत्रियस्य ५ अकृतात्मनामजितेंद्रियाणां ६ तं विज्ञायतुमेवत्तद्दर्शनादिकमभिनंदति तवेतित्रिभिः अ
नुग्रहो अनुशासनादिरूप एव उरुगतीः उरुगत्यः ७ विविज्ञाययतिभवानितिसप्तभिः दुहितुःस्नेहेन परिक्लिष्टस्या
त्मायस्य आवितविज्ञापितं ८ प्रियव्रतोत्तानपदोःस्वसेति अनेन भ्रातमतीत्वात् प्रत्रिकाकरणकानिरस्ता ममसु
ताइति क्षत्रकन्यात्तवयोग्येतिदर्शितं ९ प्रतीछस्वीकुरु १९ उद्यतस्य स्वतःप्राप्तस्य विषयस्य प्रतिवादः प्रत्याख्यान



तवसंदर्शनाद्दिवछिन्ना मे सर्वसंशयाः यत्स्वयं भगवान्प्रीत्या धर्ममाहरिरक्षुषेः ५ दिष्ट्यो भगवान्दृष्टो दुद्द
र्शोऽकृतात्मनां दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः शिवं ६ दिष्ट्या तवोऽशिष्टोहं कृतश्चानुग्रहो महत्
न् अपावृतैः कर्णरंध्रेर्जुष्टा दिष्ट्योरुगतीर्गिरः ७ सभवान्दुहितृस्नेहपरिक्लिष्टात्मनो मम श्रोतुमर्ह
सिदीनस्य विज्ञप्तिं कृपया मुने ८ प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम अन्विछति पतिं युक्तं वयः
शीलगुणाः [illegible] वयोगुणान् आत्मरूपान्नारदादेषात्वय्यासीत्कृत
निश्चया ११ [illegible] सर्वात्मनानुरूपां ते गृहमेधेषु कर्मसु १९ उद्य
तस्य हि कः ... न्न सस्यते अपि निर्मुक्तसंगस्य कामरक्तस्य किंपुनः १२ य उद्यतमनादृत्य की
नानामभियाचिते क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः १३ अहं त्वाशृणवं विद्वन् उद्वाहार्थं समु
द्यतं। अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण मे १४

१२ कीनानां कृपणां अवज्ञयापराधमानेन १३ यस्य सावधिब्रह्मचर्यं स उपकुर्वाणः प्रत्तां मया दत्तां अप्रत्तांचेति च
ष्येण एवकृतनिश्चयत्वात् कस्मैचित् प्रतिश्रुता न भवतीत्यर्थः १४ श्रीकृष्णाय नमः श्रीरामाय नमः श्रीश्रीश्री

स्वसैन्यस्य चरणैः क्रान्तं संघट्टितं ५५ वर्णाश्रमाणां निबंधनं यैः व्रतम् अहो ५६ निरंकुशैर् नृभिर् निमित्तभूतैः आयानेन निश्चितं ५६ निर्वि
त्तीके न संहर्षेण आ प्रतिपद्यामहे स्वीकुर्महे ५७ इति तृतीये एकविंशः ।। द्वाविंशे कर्दमाय ।। दाद्यथादिष्टं हि विधिना मनुर्दुहि
तरं देवहूतिम् इत्युपवर्ण्यते १ एवम् आविः कृतः अशेषाणां गुणानां कर्मणां च उदय उत्कर्षो यस्य सः सम्राट् मनुः सव्रीड इ
स्वकीर्तिश्रवणात् प्रत्याख्यानशंकया वा तं मुनिम् उवाच उपारतं निवृत्तिनिरतं १ मदीयाकृत्यात् च यापरिणतेति वि

[illegible] मनिबंधना भगवद्रचिता राजन् भिद्येरन् बत दस्युभि ५५ अधर्मश्च समेधेत लो
भवतो नेत्रान्यपतन् [illegible] दस्युग्रस्तो विनंक्ष्यति ५६ अथापि पृच्छे त्वां वीर यदर्थे त्वमिहा
अमृतजलं महर्षिगणसेवितं ३९ पुराण [illegible]
गमः [illegible] सुदा ५७ इति श्रीभागवते महापुराणे तृतीयस्कंधे एकविंशोध्या
यः २१ मैत्रेय उवाच एवमाविष्कृताशेषगुणकर्मोदयो मुनिं सव्रीड इव तं सम्राड् उपारतम् उवाच ह १
मनुरुवाच ब्रह्मासृजत् स्वमुखतो युष्मान् आत्मपरीप्सया छंदोमयस्तपोविद्यायोगयुक्तान् अलंपटान् २
तत्त्राणायासृजच्चास्मान् दोःसहस्रात् सहस्रपात् हृदयं तस्य हि ब्रह्म क्षत्रम् अंगं प्रचक्षते ३ अतो ह्यन्यो
न्यमात्मानं ब्रह्म क्षत्रं च रक्षतः रक्षति स्माव्ययो देवः परः सदसदात्मकः ४ श्रीकृष्णाय नमः ।। छं

त्रापयिष्यन् युस्मदस्मत्संबंधस्तावदीश्वरेण पूर्वमेव घटित इत्याह ब्रह्मेति सार्द्धाभ्यां आत्मनः परीप्सया पर्याप्तुमिच्छ
या छंदोमयस्यात्मनः पर्याप्तिः पालनं वेदप्रवर्तनं तस्येच्छया युष्मान् ब्राह्मणान् २ तत्त्राणाय ब्राह्मणपालनाय ब्रह्म
ब्राह्मणजातिः क्षत्रजातिः ३ एवं सद्देवरक्षति स्म कोसौ प्रभुः सदसदात्मकः सर्वात्मकः तथापि अव्ययो निर्विकारः ४

उग्रधन्वन् भो विदुर लुलुभे मुनेर्मुखेन स्मितेन यद्वा मुखेन प्रलोभितवान् २१ सम्यक् अनंतरं महिष्याश्च व्यवसितं
निश्चितं ज्ञात्वा २२ पारिबर्हान् विवाहकाले प्रदेयान् भूषाः भूषणानि च २३ प्रत्तां प्रदत्तां सदृक्षाय योग्याय दत्त्वा गतव्य
था चिंता यस्य औत्कंठेनोन्मथितः क्षुभितः आशयो यस्य २४ तस्याः विरहं सोढुं अशक्नुवन् अंब वत्से इति ब्रुवन् संधिराः शिखाः
केशान् सिंचन् २५ ऋषिकुल्यहितायाः उभयोः सुरोधसोः शोभनतटयोः २७ अभिप्रेत्य ज्ञात्वा ब्रह्मावर्तदेशात् स्वपतिं

मैत्रेय उवाच स उग्रधन्वन्नियदेवाबभाषे आसीच्च तूष्णीमरविंदनाभं धियोपगृह्णन् स्मितशोभितेन मु
खेन चेतो लुलुभे देवहूत्याः २१ सोनुज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटं तस्मै गुणगणाढ्याय ददौ तु
ल्यां प्रहर्षितः २२ शतरूपा महाराज्ञी पारिबर्हान् महाधनान् दंपत्योः पर्यदात्प्रीत्या भूषावासः परिछ
दान् २३ प्रादात् दुहितरं सम्राट् सदृक्षाय गतव्यथः उपगृह्य च बाहुभ्यामौत्कंठ्योन्मथिताशयः २४
अशक्नुवंस्तद्विरहं मुंचन्बाष्पकलां मुहुः आसिंचदंब वत्सेति नेत्रोदैर्दुहितुः शिखाः २५ आमंत्र्य तं
मुनिवरमनुज्ञातः सहानुगः प्रतस्थे रथमारुह्य सभार्यः स्वपुरं नृपः २६ उभयोरृषिकुल्यायाः सरस्व
त्याः सुरोधसोः ऋषीणामुपशांतानां पश्यन्नाश्रमसंपदः २७ तमायांतमभिप्रेत्य ब्रह्मावर्तात्प्रजाः प
तिं गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः २८ बर्हिष्मती नाम पुरी सर्वसंपत्समन्विता न्यपतन्य
त्र रोमाणि यज्ञस्यांगं विधुन्वतः २९

प्रत्युज्जग्मुः २८ कोसौ ब्रह्मावर्त इत्यपेक्षायामाह तत्र बर्हिष्मती नाम पुरी सापि कुत्र यत्र यज्ञस्य यज्ञवराहस्य रो
माणि पतन्निति पत्रेति सर्वत्र संबध्यते २९

आद्यः प्रथम एवं विवाहाभावात् मुख्य इति वा २५ भूयात् भवेत् प्रतीतः गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या इत्यादिमंत्रप्र
सिद्धः स्वयं अङ्गकान्त्यैव धिः अयं भूषणादिरूपो यस्याः २६ यां विलोक्य मन्यपतत् संमोहेन विमूढव्याकुलचित्तो यस्याः कराङ्गु
मेऽघ्रिभ्यां शोभा यस्य ललनानां ललाम भूषणाभूता असेवितोऽपि अचरणोयैः इतरैः दृष्टो ब्रह्मयोगपाउ च्चपदः उत्तान
पादस्य अभिपाता स्वयंप्राप्ता २८ भजिष्ये स्वीकरिष्ये पात्रदपते त्यक्तिस्त्वावज्ञा इस्यां ततः परं संन्यास इति भावाव
धसमयः तमेवाह यावत् आत्मनो मम तेजोगर्भं विभृयात् यद्वा मम आत्मनो देहात् च्युतं तेजो वीर्यं विभर्यादिति

ऋषय उवाच ॥ बाढमुद्वोढुकामो ... मेत्रा तनयात्मजा आवयोरनुरूपोऽसावाद्यो वैवाहिको विधिः
२५ कामः स भूयान्नरदेव तस्याः पुत्र्याः समाम्नायविधौ प्रतीतः क एव ते तन्यां नाद्रियेत स्वयैव कान्त्या
क्षिपतीमिव श्रियं २६ यां हर्म्यपृष्ठे क्वणदङ्घ्रिशोभां विक्रीडतीं कन्दुकविह्वलाक्षीं विश्वावसुर्न्यपत
त्स्वाद्विमानाद्विलोक्य सम्मोहविमूढचेताः २७ तां प्रार्थयन्तीं ललनाललामसेवितश्रीचरणैरदृष्टां व
त्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोऽभियातां २८ अतो भजिष्ये समयेन साध्वीं यावत्तेजो विभृ
यादात्मनो मे ततो धर्मान् पारमहंस्यमुख्यान् शुक्लप्रोक्तान् बहु मन्येऽविहिंस्रान् २९ यतोऽभवद्विश्वमिदं वि
चित्रं संस्थास्यते यत्र च वाऽवतिष्ठते प्रजापतीनां पतिरेष मह्यं परं प्रमाणं भगवाननन्तः ३० श्री श्री श्री

अतः परं पारमहंस्यं ज्ञानं तस्मिन् मुख्यान् शुक्लेन विष्णुना साक्षात्प्रकर्षेणोक्तान् अविहिंस्रान् हिंसारहितान् शमद
मादीन् बहु यथा भवति तथैवमनुष्ठेयात् मन्ये २९ ननु तव पितुः प्रजापते राज्ञा स्वयमेव न संन्यासे तत्राह यत इति
संस्थास्यते प्रलयं यास्यति वा चेति एवार्थे कृणात्र थापकरणानांतर संन्यास एव मया इत्ताना भगवतोक्त इत्यर्थः ३० श्री

दिव्यास्तु अंतरिक्षाः मानुषाः शत्रुप्रभवाः भौतिकाः शीतोष्णादिप्रभवाः वैयासे हे विदुर तस्य सान्मातित्रायमाहृय इति त्रि
रां साधारणधर्मान् तस्य यदपत्य देवहूतिः तस्मादयं प्रभावः ३८ इति तृतीये द्वाविंशोऽध्यायः त्रयोविंशे तयो योगनि
र्मिते सर्वसंपदि विमाने कामगे चित्रा तयोरतिरुदीर्यते २ प्रस्थिते गमने कृते सति १ दंभं कपटं अघं निषिद्ध
चरणं तेजीयांसं अतितेजस्विनं दैवाद्गरीयसः दैवादपि गुरुतरात् दैवमपि अन्यथाकर्तुं समर्थादित्यर्थः ४

भौतिकाश्च कथं क्लेशा बाधंते हरिसंश्रय यः पृष्टो मुनिभिः प्राह धर्मान्नानाविधान्शुभान् ३८ नृणां वर्णाश्र
माणां च सर्वभूतहितः सदा एतत्ते आदिराजस्य मनोश्चरितमद्भुतं वर्णितं वर्णनीयस्य तदपत्योदयं शृ
णु ३८ इति श्रीभागवते महापुराणे तृतीयस्कंधे द्वाविंशोऽध्यायः॥२२॥ मैत्रेय उवाच पितृभ्यां प्रस्थिते सा
ध्वी पतिमिंगितकोविदा नित्यं पर्यचरत्प्रीत्या भवानीव भवं प्रभुं १ विश्रंभेणात्मशौचेन गौरवेण दमे
न च शुश्रूषया सौहृदेन वाचा मधुरया च भोः २ विसृज्य कामं दंभं च द्वेषं लोभमघं मदं अप्रमत्तोद्यता
नित्यं तेजीयांसमतोषयत् ३ स वै देवर्षिवर्यस्तां मानवीं समनुव्रतां दैवाद्गरीयसः पत्युराशासानां महा
शिषः ४ कालेन भूयसा क्षामां कर्शितां व्रतचर्यया प्रेमगद्गदया वाचा पीडितः कृपयाब्रवीत् ५ कर्दम उ
वाच तुष्टोहमद्य तव मानवि मानदायाः शुश्रूषया परमया परया च भक्त्या यो देहिनामयमतीव सुहृत्स
देहो नावेक्षितः समुचितः क्षपितुं मदर्थे ६ ये मे स्वधर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिता भगवत्प्रसा
दाः तानेव ते मदनुसेवनयावरुद्धान् दृष्टिं प्रपश्य वितराम्यभयानशोकान् ७

वृतचर्यया कर्शितां तत्रापि भूयसा कालेनातिक्षामामित्यर्थः ५ हे स्त्रियः मदर्थे क्षपयितुं नावेक्षितः न गणितः समुचितः श्लाघ्यो
पि मत्सेवया शुल्कया उपेक्षित इत्यर्थः ६॥ तपश्च समाधिश्च विद्या च उपासना तासु तपः आत्मयोगः चित्तैकाग्र्यं तैर्विजिताः प्राप्ता
भगवत्प्रसादा दिव्या भोगाः तानेव अवरुद्धान् त्वया वशीकृतान् प्रपश्य ते दिव्यां दृष्टिं वितरामि यया दृष्ट्या इत्यसि ७ श्री

बर्हिष्मतीनामनिरुक्तिं वदन् प्रसंगादेतस्याः श्रैष्ठ्यमाह द्वाभ्यां कुशाः काशाश्चासन् शश्वन्नित्यं हरिं हरितवर्चो वर्णो
येषां यज्ञघ्नान् राक्षसादीन् पराभवं नीत्वा ३० यज्ञं विष्णुं यजत इति यज्ञायजत् भुवं स्थानं लब्धेति तच्च प्रत्ययात्तं
लब्धवान्सन्नित्यर्थः यतो लब्धवान् तं यज्ञपुरुषमिति वा स्वर्गादपि भूमिः श्रेष्ठा तत्रापि तत्स्थानं श्रेष्ठमित्युक्तं भव
ति ३१ प्रस्तुतमाह यां बर्हिष्मतीनाम पुरीं समावसत् आसमन्तात् वसति स्म पूर्वं यस्यामुषितः तस्यां निर्विश्य भवनं प्रविष्ट
सन् भोगान्बुभुजे इत्यन्वयः ३२ अन्येषां धर्मादीनामविरोधेन ३३ प्रत्यूषे उषस्सु संगीयमाना सत्कीर्तिर्यस्य त

कुशाः काशास्त एवासन् शश्वद्धरितवर्चसः ऋषयो यैः पराभाव्य यज्ञघ्नान्यज्ञमीडिरे ३० कुशकाश
मयं बर्हिरास्तीर्य भगवान्मनुः अयजद्यज्ञपुरुषं लब्धा स्थानं यतो भुवि ३१ बर्हिष्मतीनाम विभुर्यां निर्वि
श्य समावसत् तस्यां प्रविष्टो भवनं तापत्रयविनाशनं ३२ सभार्यः सप्रजः कामान्बुभुजेऽन्याविरोधतः सं
गीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः ३३ प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन्हरेः कथाः निस्नातं योगमा
यासु मुनिं स्वायंभुवं मनुं ३४ यदा भ्रंशयितुं भोगा न शेकुर्भगवत्परं अयातयामास्तस्यासन्यामा
स्वांतरयापनाः ३५ शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः स एवं स्वांतरं निन्ये युगानामेकसप्तति
३६ वासुदेवप्रसंगेन परिभूतगतित्रयः शारीरा मानसा दिव्या वैयासे ये च मानुषाः ३७

यापि स्वहरेरेव कथाः शृण्वन् भोगान्बुभुजे योगमायामुपेत्य लोकभोगरचनासु ३४ यद्यतः आभ्रंशयितुं ईषदपि भ्रं
शयितुं अभिभवितुं अयातयामाः कालावयवा यस्य पक्वस्यान्नस्य तद्गतसारं भवति ततोऽन्यदगतसारं यातयामं उ
च्यते अयातयामा अगतसारा आसन् कथंभूता यामाः स्वांतरयापनाः स्वांतरं स्वमन्वंतरं यापयंति प्रवर्तयंतीति यामि अ
होरात्राणि तानि अगतसाराण्यासन् तत्कृतः विष्णोः कथाः शृण्वतः विष्णुं ब्रुवतः ध्यायतः स्वांतरं तदीयमन्वंतरं न
यति येषां ते कालावयवाः ३५ कुर्वतः स्ववाक्ये रूपनिबंधतः ३६ परिभूतगतित्रयं जाग्रदादि सात्विकादि वा येन सः

र्हि तत्क्षणमेव आविरचीकरत् आविर्भावयांबभूव रो देवदे विशिनष्टि सर्वकामदुघमिति नवभिः १२ सर्वैरत्नादि
भिः समन्वितं सर्वसंपदां य उपचयस्तस्य उदर्कः उत्तरोत्तराभिवृद्धिर्यस्मिन् उपस्कृतं शोभितं १३ उपकरणं प
रिकरः पट्टिका अल्पविस्तारपटवस्त्रविशेषाः पताकाः प्रसिद्धास्ताभिः १४ विचित्राणि माल्यानि पुष्पाणि यासु मंजु
यथा भवत्येवं सिंजंतः षडंघ्रयो यासु ताभिः स्रग्भिः उपर्युपरि विरचितगृहेषु कशिपुभिः शय्याभिः कांतं कमनीयं
पर्यंकादिभिश्च कांतं १६ द्वाःसु द्वारेषु विद्रुमनिर्मिता देहली उदुंबरस्तया भाते वज्रखचितकपाटयुक्तं १८

मैत्रेय उवाच॥ प्रियायाः प्रियमन्विच्छन्कर्दमो योगमास्थितः विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत् १२
सर्वकामं दुघं दिव्यं सर्वरत्नसमन्वितं सर्वर्द्ध्युपचयोदर्कं मणिस्तंभैरुपस्कृतं १३ दिव्योपस्करणोपेतं स
र्वकालसुखावहं पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतं १४ स्रग्भिर्विचित्रमाल्याभिर्मंजुसिंजत्षडंघ्रि
भिः दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितं १५ उपर्युपरि विन्यस्तनिलयेषु पृथक्पृथक् क्षिप्तैः कशि
पुभिः कांतं पर्यंकव्यजनासनैः १६ तत्रतत्र विनिक्षिप्तनानाशिल्पोपशोभितं महामरकतस्थल्या जुष्टं
विद्रुमवेदिभिः १७ द्वाःसु विद्रुमदेहल्या भातिवज्रकपाटवत् शिखरेष्विंद्रनीलेषु हेमकुंभैरधिश्रितं १८
चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः १९ हंसपारावतव्राते
स्तत्रतत्र निकूजितं कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च २० विहारस्थानविश्रामसंवेशप्रांगणाजिरैः
यथोपयोषं रचितैर्विस्मापनमिवात्मनः २१

नीलमयेषु शिखरेषु प्रासादाग्रभागेषु १८ चक्षुष्मंतः इव ये पद्मरागाग्र्यास्तैर्यद्वा चक्षुष्मद्दीपकैः पद्मरागाग्र्यैः विचित्रैर्वैतानैर्वि
तानसमूहैः १९ कृत्रिमानपि हंसादीन्स्वान्स्वजातीयान्मन्यमानैस्तत्रतत्राधिरुह्य कूजितं २० विहारस्थानं क्रीडाप्रदेशः
विश्रामः शयनगृहं संवेशः उपभोगभूमिः प्रांगणानि गृहाद्बहिः अजिरं प्राकारादिः यथोपजोषं यथासुखं आत्मनः स्वस्यापि

अन्येपुनर्भोगाः किंनकिमपि अतितुच्छाच इत्यर्थः तत्रहेतुः भगवतोउरुक्रमस्यपाभ्रुवः तस्याउद्विजृम्भः वक्रीभावः तेनवि
भ्रंशिता अर्थरचनामनोरथायेषु निजधर्मेयानिवृत्त्येनदुह्यन्तइतितथातान् दुरधिगमानदःप्रायान् नृपावयमिति
याविक्रियास्तत्प्रयोगविकृतयस्ताभिः ८ अखिलयोगमायाख्यविद्यअततदुपासनास्तासैविद्वत्तेणनिपुणामेवंब्रु
वाणांपतिमवेक्ष्य गताधिर्निश्चिन्ता जाता संप्रश्रयोविनयः प्रणयः प्रेमताभ्यांगद्गदतयागिराईषद्व्रीडासहितोयो
वलोकस्तेनविलसद्धसितमाननंयस्याः साआहजगाद ९ बतेतिहर्षे द्विजवृषद्विजश्रेष्ठहेभर्तः त्वयिएतत्स्वं
राद्धंसिद्धमेवतदहमवैमिजानामि किंतु यस्त्वयासमयोभिहितः सतावद्भूयात्सकृदितिगर्भसंभवमात्रपर्यन्त

अन्येपुनर्भगवतोभ्रुवउद्विजृम्भविभ्रंशितार्थरचनाः किमुरुक्रमस्य सिद्धासि भुंक्ष्वविभवान्निजधर्मदोहान् दिव्या
न्नरैर्दुरधिगान्नृपविक्रियाभिः ८ एवंब्रुवाणमबलाखिलयोगमायाविद्याविचक्षणमवेक्ष्यगताधि
रासीत् संप्रश्रयप्रणयविह्वलयागिरेषद्व्रीडावलोकविलसद्धसितानताह ९ देवहूतिरुवाच॥
राद्धंवतद्विजवृषैतदमोघयोगमायाधिपेत्वयिविभोहमवैमिभर्तः यस्तेभ्यधायिसमयः सकृदङ्ग
संगोभूयाद्गरीयसिगुणः प्रसवः सतीनां १० तत्रेतिकृत्यमुपशिक्षयथोपदेशंयेनैवमेकर्शितोति
रिरंसयात्मा सिद्ध्येततेकृतमनोभवधर्षितायादीनस्तदीशभवनंसदृशंविचक्ष्व ११

इत्यर्थः यस्माद्गरीयसिश्रेष्ठेभर्तरिहेतुभूतेस्त्रीणांप्रसवोगुणः महान्लाभः समासपाठेगरीयसिपत्यौसतिस
तीनांयतोगुणः प्रसवः गुणविस्तारोभवति अतः पुत्रोत्पत्यामम गुणविस्तारेजाते पश्चात्त्वदुक्तं सर्वंभवत्विति
भावः १० अंगसंगार्थंचप्रथममितिकर्तव्यतांसंपादुपेत्याह हे ईश तत्र अंगसंगे इतिकृत्यंसाधनंयथोपदेशं
कामशास्त्रानुसारेणउपशिक्षजानीहि उपकल्पयेत्यर्थः रतिसमर्थोभवेत् कथंभूतायाः तेत्वयैवकृतःदो
भिनोयोमनोभवस्तेनधर्षितायाः ततोनुरूपंभवनंचविचक्ष्ववितर्कयविचारयेतियावत् ११ येनसाधनेनात्मा

विरजमित्यस्यअपंच स्नानं उद्वर्त्य क्षालितं कृतशिरःस्नानमभ्यंगो येन भूषितत्वमेवाह निष्कपदिकं भूषणविशे षेग्रीवायोयस्य ३१ वहूनिरत्नानि यस्यां तया रुचकेमंगलद्रव्येणकुंकुमादिना तदुक्तं विश्वप्रकाशे रुचकंमं गलद्रव्येग्रीवाभरणादेत्तयोरिति ३२ सुदतासुभ्रुवाचक्षुषतिचजतावेकवचनानि एतैर्लक्षणैः शोभमानंमुखंयस्य कथंभूतेनचक्षुषाश्लक्ष्णोमनोहरःस्निग्धोऽपांगोनेत्रप्रांतोयस्य पद्मकोशेचस्पर्द्धतइतिपद्मकोशस्पर्द्धितनेत्रे

स्नातंकृतशिरःस्नातंसर्वाभरणभूषितं निष्कग्रीवंवलयिनंकूजत्कांचननूपुरं ३१ श्रोण्योरध्यस्तयाकां च्याकांचन्याबहुरत्नया हारेणचमहार्हेणरुचकेनचभूषितं ३२ सुदतासुभ्रुवाश्लक्ष्णस्निग्धापांगे नचक्षुषापद्मकोशस्पृधानीलैरलकैश्चलसन्मुखं ३३ यदासस्मारऋषभमृषीणांदयितंपतिं त त्रैवास्तेसहस्त्रीभिर्यत्रास्तेसप्रजापतिः ३४ भर्त्तुःपुरस्तादात्मानंस्त्रीसहस्रवृतंतदा निशाम्यतद्योगगतिं संशयंप्रत्यपद्यत ३५ सतांकृतमलस्नानांविभ्राजंतीमपूर्ववत् स्वं [illegible]नाविभ्रतीरूपंसंवीतरुचिरस्त नीं ३६ विद्याधरीसहस्रेणसेव्यमा[illegible]तभावोविमानंसिद्धारोहयदमित्रहन् ३७ तस्मिन्न लुप्तमहिमाप्रिययानुरक्तोवैकल्पतेरुपनिषेवितोनभ्राजउत्कचकुमुद्गणवानपीच्यस्तारा भिरावृतइवोडुपतिर्नभस्थः ३८

३३ दृष्ट्वाचयद्दयितंयस्मात्तदापत्नीसौतत्रैवस्वयमप्यास्ते आत्मानंनिशाम्यदृष्ट्वा तस्ययोगगतिंयोगप्रभावंदृष्ट्वासंशयं किमिदमितिविस्मयं ३५ समुनिर्विवाहप्राक्यदात्मनोरूपंतदेवपुनर्बिभ्रतीसंवीतौप्रावृतौरुचिरौस्तनौयस्यापाठांतरेतु रूपविशेषणं ३६ शोभनेवाससीयस्याःजातोभावःप्रेमयस्यहेऽमित्रहन् जितकामा ३७ तस्मिन्विमानेमुनिर्बभ्राज अलुप्तोमहिमास्वातंत्र्यंयस्यउपचीर्णोऽनुकूलभूषितंवपुर्यस्य विकसितकुमुदगणवान् अपीच्योऽतिसुंदरःए कत्वाच्च न

नातिप्रीतेन मलिनदेहत्वात् परिचारिकाभावाच्च २२ अस्मिन् ह्रदे विंदुसरसि आरुह अधिरोह शुक्लेन विष्णुना कृतं आनंदाश्रुबिंदुनिपातेन पापकं आपकं २३ समादाय आदृत्य सरजं मलिनं २४ शबलौ विवर्णौ स्तनौ यस्मिन् तत् सरस्वत्याः शिवानि जलानि आशेरते यस्मिन् शिवजलाशयाः जलचरा यस्मिन् इति वा २५ सांतः अंतर्निमग्ना सती वेश्मस्थाः ददर्श तमाह सांतःसरसीति दशभिः उत्पलगंधयः २६ स्त्रियः प्रोचुः तव कर्मकरीः परिचारिका वयं अस्मान् आज्ञापयेति

दृष्ट्वा गृहं तत्पतिं नातिप्रीतेन चेतसा सर्वभूताशयाभिज्ञः प्रावोचत् कर्दमः स्वयं २२ निमज्ज्यास्मिन् ह्रदे भीरु विमानमिदमारुह इदं शुक्लकृतं तीर्थमाशिषां यापकं नृणां २३ सा तद्भर्तुः समादाय वचः कुवलयेक्षणा। सरजं बिभ्रती वासो वेणीभूतांश्च मूर्धजान् २४ अंगं च मलपंकेन संछन्नं शबलस्तनं आविवेश सरस्वत्याः सरः शिवजलाशयं २५ सांतःसरसि वेश्मस्थाः शतानि दश कन्यकाः सर्वाः किशोरवयसो ददर्शोत्पलगंधयः २६ तां दृष्ट्वा सहसोत्थाय प्रोचुः प्रांजलयः स्त्रियः वयं कर्मकरीस्तुभ्यं शाधि नः करवाम किं २७ स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीं दुकूले निर्मले नूत्ने ददुरस्यै च मानदाः २८ भूषणानि परार्घ्यानि वरीयांसि द्युमंति च अन्नं सर्वगुणोपेतं पानं चैवामृतासवं २९ अथादर्शे स्वमात्मानं स्रग्विणं विरजांबरं विरजं कृतस्वस्त्ययनं कन्याभिर्बहुमानितं ३०

२७ ततः स्नानेन योग्यतैलादिना २८ परार्घ्यानि उत्कृष्टानि वरीयांसि तत्तत्प्रियाणि दीप्तिमंति च पानं पेयं अमृतं स्वादु आसवं मादकं २९ आदर्शे स्वमात्मानं ददर्शेति शेषः आत्मानं यस्मिन् हि चतुर्भिः कृतस्वस्त्ययनं मंगलं यस्य पुंस्त्वनात्म

श्री·भा·त·टी·
८२

प्रव्रजिष्यंतंआलक्ष्यवितर्क्यस्मयमानावहिः अतस्तुविक्लवेनव्याकुलेनविदूयतासं।
त्तरेणान्वयः ४८ नखाएवमणयःतैःश्रीःशोभायस्यतेनपदाभुवंलिखंतीतिदुरंतचिंतालक्षणं ४९ चकाराद्देवहूतिंच।
पादितवान् अभयमिति भाविनोदैन्यात्संसाद्युपदयंतन्निवर्त्तयेत्यर्थः ५१ तत्रदैन्यंनिवेदयति तुभ्यंतवसुलभमेवेतेति
मिःस्वयमेवात्मनःसमायोग्याःपतयोतिमृग्याइतिदैन्यप्राप्तं त्वदवस्थानेनप्रव्रजितुत्रःकश्चित्किंस्यादित्यर्थः ५२ स्व

पतिंसाप्रव्रजिष्यंतंतदालक्ष्योशतीसती स्मयमाना विक्लवेनहृदयेनविदूयता ४८ सलिखंत्यधोमुखी।
भूपदानखमणिश्रिया उवाचललितांवाचंनिरुध्याश्रुकलांशनैः ५० देवहूतिरुवाच॥ सर्वंतद्भगवान्म
ह्यमुपोवाहप्रतिश्रुतं अथापिमे प्रपन्नाया अभयंदातुमर्हसि ५१ ब्रह्मन्दुहितृभिस्तुभ्यंविमृग्यापत
यःसमाः कश्चित्स्यान्मेविशोकायत्वयिप्रव्रजितेवनं ५२ एतावतालंकालेनव्यतिक्रांतेनमेप्रभो इंद्रि
यार्थप्रसंगेनपरित्यक्तपरात्मनः ५३ इंद्रियार्थेषुसज्जंत्याप्रसंगस्त्वयिमेकृतः अजानंत्यापरंभावंतथाप्य
स्त्वभयायमे ५४ संयोगःसंसृतेर्हेतुरसत्सुविहितोधिया सएवसाधुषुकृतोनिःसंगत्वायकल्पते ५५
नेहयत्कर्मधर्मायनविरागायकल्पते नतीर्थपादसेवायैजीवन्नपिमृतोहिसः ५६ साहंभगवतोनूनंवंचिता
माययादृढं यस्त्वांविमुक्तिदंप्राप्यनमुमुक्षेयबंधनात् ५७ इतिश्रीभागवतेतृतीयस्कंधेत्रयोविंशोध्यायः २३

विषयानभुंक्ष्वकिंब्रह्मविद्ययेतिचेत्तत्राह एतावतालंपूर्व्योक्तो परित्यक्तःपरआत्माययातस्यामम ५३ स्वकृतमनुशोचं
त्याह इंद्रियार्थेष्वितिचतुर्भिः मेमयापरंभावंत्वंब्रह्मविदितिप्रसंगः कथममैभयायतत्राह संयोगइति ५४ अधियाज्ञा
निन ५५ स्वभावतःप्रवृत्तंयस्यकर्मधर्मार्थनकल्पतेधर्माभिमुखंभवेत् तत्रापिनिःकामधर्मद्वाराविरागायनकल्पतेतत्रबो
राचनतीर्थपदस्यहरेःसेवार्थंनपर्यवस्येदित्यर्थः ५६ नममुक्षेयमोक्तुमिच्छानकृतवत्यस्मि ५७ इतितृतीयेत्रयोविंशः २३

राम
राम

तेन विमानेन अष्टलोकपालानां विहारो यस्मिन् कुलाचलेन्द्रे मेरौ तस्य द्रोणीषु दरीषु अनंगस्य सखा यो मारुतः शील
सुधमदाद्दि अनिलः तेन सेवमानसौभाग्यसौदर्यघायासु सिद्धैर्नुतः स्तुतः सन् धुनिगंगा तस्याः पातेन शिवः स्वनो यासु तासु
रमे लालनावरूथीस्त्रीसमूहान् ३९ वैश्रंभकादिषु देवोद्यानेषु मानसे च सरसि रतः प्रीतः सन् ४० अन्यत्रात अति
कम्यस्थितः ४१ उद्दामचेतसां धीराणां व्यसनं संसारः तस्या प्रत्ययो यस्मात् ४२ प्रेक्षयित्वा दर्शयित्वा भूगोलमंडलं।
स्वसंस्थायाः दीपवर्द्धिरचनया यावत् तावत् बहून्याश्चर्याणि यस्मिन् तं ४३ विभज्य नवधा नव प्रभेदेन आत्म अपी चे

तेनाष्टलोकपविहारः कुलाचलेन्द्रे तस्याणीषु अनंगसखमारुतसौभगासु सिद्धैर्नुतो धुधुनिपातशिवःस्वनासु रेमे
चिरं धनदवल्ललनावरूथी [illegible] दैवतेषु पुण्यभद्रके मानसे चैत्ररथ्ये च सरे मेर मया रतः।
४० आजिह्मम् विमानेन कामगेन महीयसा [illegible] लोकान् व्यातिलः ४१ किं दुरापादनं तेषां
पुंसामुद्दामचेतसां यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ४२ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसंस्थया
बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्त्तत ४३ विभज्य नवधाऽऽत्मानं मानवीं सुरतोत्सुकां रामां निरमयन् रेमे व
र्षपूगान् मुहूर्त्तवत् ४४ यस्मिन् विमान उत्कृष्टां शय्यां रतिकरीं श्रिता न चाबुध्यत तं कालं पत्याऽपीच्येन संग
ता ४५ एवं योगानुभावेन दंपत्यो रममाणयोः शतं व्यतीयुः शरदः कामलालसयोर्मनाक् ४६ तस्यामाधत्त रे
तस्तां भावयन्नाऽऽत्मनात्मवित् नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः ४७ अतः सा सुषुवे सद्यो देवहूतिः
स्त्रियः प्रजाः सर्वास्ताश्चारुसर्वांग्यो लोहितोत्पलगंधयः ४८

ना

नसर्वांगसुंदरेण पत्या कृत्वा ४५ शरदः संवत्सराः मनाक् ईषदिव व्यतीयुः ४६ आत्मना स्वदेहार्द्धरूपेण अतिप्रीत्या भा
वयन् तथासति यदपत्यं भवेदिति नोधा नवधा सर्वसंकल्पविदिति तस्य बहु पत्यसंकल्पज्ञानमित्यर्थः विभुः तस्यादु
र्तुं समर्थश्च आत्मविदिति तस्यामनासक्तश्चात् स्त्रियो जाता इति भावः पुमान्पुंसोऽधिके शुक्रे स्त्री [illegible] मंगलैर्यस्य पुंस्त्वनात्म
स्मृतेः अतः अनंतरमेव सद्यः एकस्मिन्नेवाह्नि चारूणि सर्वांगानि यस्याः ४८ श्रीक

ना

सभाजयन्पूजयन् प्रहृष्यमाणैरसुभिरिंद्रियैरुपलक्षितःकर्दमंचेदमभ्यधादितिद्वयोरन्वयः १० चकाराद्देवहूतिंच। तत्रत्वयेतिपंचभिः ११ कर्दमंप्रत्याह अपचितिःपूजाकृतायद्यस्मात्निःकपटंसम्यक्गृहीतवान् अनुमन्येतेति यतएतावत्येवमनेकधाप्रभावैर्वृंहयिष्यंतिवर्द्धयिष्यंतिऋषिमुख्येभ्योमरीच्यादिभ्यः १५ पुत्रस्तुसाक्षादीश्वरइत्याह वेदाहमितित्रिभिः शेवधिंनिधिं सर्वाभीष्टदं देवहूतिंप्रत्याहत्रिभिः १६ ज्ञानंशास्त्रोक्तंविज्ञानमपरोक्षंचतदेवयोग

भगवंतंपरंब्रह्मसत्वेनांशेनशत्रुहन् सत्वसंख्यानविज्ञप्त्यैजातंविद्वानजःस्वराट् १० सभाजयनविशुद्धेनचेतसातच्चिकीर्षितं प्रहृष्यमाणैरसुभिःकर्दमंचेदमभ्यधात् ११ श्रीब्रह्मोवाच॥ त्वयामेपचितिस्तातकल्पितानिर्व्यलीकतः यन्मेसंजगृहेवाक्यंभगवान्मानदमानयन् १२ एतावत्येवशुश्रूषाकार्यापितरिपुत्रकैः बाढमित्यनुमन्येतगौरवेणगुरोर्वचः १३ इमादुहितरःसत्यस्तववत्ससुमध्यमाः सर्गमेतंप्रभावैस्स्वैर्बृंहयिष्यंत्यनेकधा १४ अतस्त्वमृषिमुख्येभ्योयथाशीलंयथारुचिः आत्मजाःपरिदेह्यद्य विस्तृणीहियशोभुवि १५ वेदाहमाद्यंपुरुषमवतीर्णंस्वमायया भूतानांशेवधिंदेहंबिभ्राणंकपिलंमुने १६ ज्ञानविज्ञानयोगेनकर्म[illegible] हिरण्यकेशःपद्माक्षःपद्ममुद्रापदाम्बुजः १७ एषमानविनेगर्भंप्रविष्टःकैटभार्दनः अविद्यासंशयग्रंथिंछित्वागांविचरिष्यति १८ अयंसिद्धगणाधीशःसांख्याचार्यैःसुसंमतः लोकेकपिलइत्याख्यांगंतातेकीर्तिवर्द्धनः १९ मैत्रेयउवाच॥ तावाश्वास्यजगत्स्रष्टाकुमारैःसहनारदः हंसोहंसेनयानेनत्रिधामपरमंययौ २०

उपायस्तेनकर्मणांजटामूलानिवासनाउद्धरन्उत्पाटयिष्यन् पद्ममुद्रायुक्तंपदांबुजंयस्य १७ हेमानविअविद्यास्वरूपात्मज्ञानंसंशयोमिथ्याज्ञानानितन्मयंतवहृदयग्रंथि १८ सुसंमतःसपूजितःसनगंताप्राप्स्यतिकुमारैःसहेतिशेषः १९ ततस्तेनारदसहितश्चमरीच्यादीनविवाहार्थमवस्थाप्यनैष्ठिकेरेतैःपंचभिःसहैव[illegible]ब्रह्मलोकाययौत्रिधामतृतीय

राम

चतुर्विंशे ततो जन्म कपिलस्याह तत्पितुः प्रव्रज्यानमनुज्ञाप्य ऋणत्रयविमोचनात्॥ ॥ श्लाघ्यां शुक्लेनाभिव्याहृतं
सहाहं स्वांशकलयेत्यादि १ इत्थं मा खिदः खेदं माकार्षीः आत्मानं प्रति अहं भाग्यहीनेति अदूरात् शीघ्रं २ दमेन इंद्रियसं
यमेन स्वधर्मेण तपसा सिद्धविरणदानानि च तैः ३ हृदयग्रंथिं चिज्जडात्मकमहंकारं तद्वचां विधं छेत्ता छेत्स्यति औद
र्यः पुत्रः सन् ब्रह्म भावयति उपदिशतीति तथा ४ श्रद्धया विश्वस्य बहुतिथे बहुतरे काले इति काले घनाघना इत्येकं प

मैत्रेय उवाच॥ निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् १ ऋषि
रुवाच मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिन्दिते भगवांस्तेऽक्षरो गर्भमदूरात्संप्रपत्स्यते २ धृतव्रतासि
भद्रं ते दमेन नियमेन च तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ३ स त्वयाराधितः शुक्लो वितन्वन्मामकं
यशः छेत्ता ते हृदयग्रन्थिमौदर्यो ब्रह्मभावनः ४ मैत्रेय उवाच॥ देवहूत्यपि संदेशं गौरवेण प्रजापतेः
सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद्गुरुं ५ तस्यां बहुतिथे काले भगवान्मधुसूदनः कार्दमं वीर्यमापन्नो
जज्ञेऽग्निरिव दारुणि ६ अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः गायन्ति तं स्म गन्धर्वा नृत्यन्त्यप्सरसो मु
दा ७ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः प्रसेदुश्च दिशः सर्वा अम्भांसि च मनांसि च ८ तत्कर्द
माश्रमपदं सरस्वत्या परिश्रितं स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ९

दं वर्षतो मेघा गायंति स्म नृत्यन्ति स्म अपवर्जिताः मुक्ताः परिश्रितं परिवेष्टितं आगत्य किं कृतवान् तदाह भगवंतमिति द्वाभ्यां
तत्वानां संख्यानं यस्मिन् तस्य शास्त्रस्य विज्ञप्त्यै विज्ञापनाय भगवंतं जातं विद्वान् अजो ब्रह्मा स्वराट् स्वत्वाधिकस्त्रियाशक्ति
तस्य चिकीर्षितं सभाजयन् पूजयन् १०
॥ श्रीरामायनमः ॥

यानि तत्तल्लौकिकानि चतुर्भुजादिरूपाणि तान्येव तेऽभिरूपाणि योग्यानि यानि यानि च स्वजनानां रोचंते मनुष्यरूपाणि तान्यपि तद्रोचं तदित्यर्थः अरूपिणः प्राकृतरूपरहितस्य ३१ अभिवाद्यं हि पादपीठं यस्य ऐश्वर्यादिभिः एतं विचारयन्नाह परप्रधानं परं तत्र हेतुः स्वच्छंदाः स्वाधीनाः शक्तयो यस्य तत एवाह प्रधानं प्रकृतिरूपं पुरुषं तदधिष्ठातारं महांतं महत्तत्त्वरूपं कालं तेषां क्षोभकं त्रिवृतं अहंकाररूपं लोकात्मकं तत्त्वपालात्मकं तदेवं मायया प्रधानादिरूपतामुक्त्वा चिच्छक्त्या निःप्रपंचतामाह आत्मानुभूत्या चिच्छक्त्या अनुगतः स्वस्मिन्लीनः प्रपंचो यस्य तं कपिलं सर्वज्ञं प्रधानाद्याविर्भावलयसाक्षिणमित्यर्थः ३३ संन्यासानुज्ञां प्रार्थयते अस्माभिरिति क्षेपः आ ईषत् यत्किंचित् इमि पृच्छामीत्यर्थः त्वया पुत्ररूपेणावतीर्णानि हृतानि ऋणानि तिर्देवादिरूपाणि यस्य सः आप्तकामश्चाहं परिव्रजतां संन्यासिनां पदवीं मार्गं आश्रितः सन् त्वां पुनः स्मरन् विचरिष्या

तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव यानि यानि च रोचंते स्वजनानामरूपिणः ३१ परं प्रधानं पुरुषं महांतं कालं कविं त्रिवृतं लोकपालं आत्मानुभूत्यानुगतप्रपंचं स्वच्छंदशक्तिं कपिलं प्रपद्ये ३२ अस्माभिः प्रच्छेऽद्य पतिं प्रजानां त्वयावतीर्णर्ण उताप्तकामः परिव्रजत्पदवीमास्थितोऽहं चरिष्ये त्वां हृदि युंजन्विशोकः ॥ ३३ कपिल उवाच मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके अथाजनि मया तुभ्यं यदवोचमृतं मुने ३४ एतन्मे जन्म लोकेऽस्मिन्मुमुक्षूणां दुराशयात् प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने ३५ एष आत्मपथोऽव्यक्तो नष्टः कालेन भूयसा तं प्रवर्तयितुं देहमिमं विद्धि मया धृतं ३६ गच्छ कामं मयापृष्टो मयि संन्यस्तकर्म ति जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ३७

मि ३३ अहं तावदृतं ज्ञानोपदेशार्थं च त्वद्गेहेऽवतीर्णः अतस्त्वं गृहे वसन्नपि मुक्तः सुलभैव सद्यश्चावसंगं त्वमेवेत्याशयेनाह तथापि मामेवानुस्मरन्गच्छेत्याशयेनाह मयेति षड्भिः सत्यलौकिके च कृत्ये लोकस्य प्रमाणं अभिदर्शयति यद्यस्मात् तुभ्यं तव पुत्रो भविष्यामीत्यवोच अथ अतएव ततः कृतं यथा भवति तथा मया अजनि जन्म स्वीकृतं ३४ दुराशयात् लिंगात् मुमुक्षूणां आत्मदर्शने संमताय तत्त्वानां प्रसंख्यानाय पंचविंशतितत्त्वानुषंगः ३५ नन्वयमात्मज्ञानमार्गः पूर्वसिद्धः एव

ग्राधृतो ब्रह्मास्मि २१ २२ युक्तो योग्यो श्रयच्छत श्रदात् २३ वितन्यते समृद्धिः क्रियते [illegible] धात्री देवता मित्यर्थः सम-
लालयत् संतोषितवान् २४ निमन्त्र्य पृष्ट्वा नन्दिहृष्टात्मा संतः २५ स च मुनिः त्रियुगं विष्णुं विविक्ते रहसि २६ पापच्यमा-
नानां भृशं दह्यमानानां निरये संसारे स्वीयैरमंगलैः पापैः २७ कुतः सर्वे देवताः प्रसन्नाः इति ज्ञानं अलभ्यन्तो भादित्याह
ह्याभ्यां बहुषु जन्मसु विपक्वेन सुसिद्धेन सम्यग्योगो भक्तियोगः तस्मिन् समाधिरैकाग्र्यं तेन शून्यागारेषु विविक्तस्थाने

गतेत्राता धृतो [illegible] ततः कर्दमस्तेन नोदितः यथोदितं सुद्धि [illegible] ब्रह्म [illegible] सृज्जा ततः २१ मरीचये कलां प्रादाद्
नसूयायुयात्रये श्रद्धामंगिरसेऽप्यच्छत्[illegible] हविर्भुजा २२ पुलहाय गतिं युक्तां क्रतवे च क्रियां सती ख्या-
तिं च भगवे प्रादच्छद्वसिष्ठायाप्यरु[illegible] इद्दौ प्रातिययपते वितन्यते विप्रर्षभान् कृतोद्वाहान्
सदारान् समलालयत् २४ ततस्त ऋषयः क्षत्तः कृतदारा निमन्त्र्य तं प्रातिष्ठन् नन्दिमापन्नाः स्वं स्वमाश्रयमंडले
२५ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभं विविक्त उपसंगम्य प्रणम्य समभाषत २६ कर्दम उवाच अहो पा-
पच्यमानानां निरये स्वैरमंगलैः कालेन भूयसा नूनं प्रसीदंतीह देवताः २७ बहुजन्मविपक्वेन सम्यग्योगसमा-
धिना द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्पदं २८ स एव भगवानद्य हेलनं विगणय्य नः गृहेषु जातो ग्राम्याणां
यः स्वानां पक्षपोषणः २९ स्वीयं वाक्यमृतं कर्तुमवतीर्णोसि मे गृहे चिकीर्षुर्भगवन् ज्ञानं भक्तानां मानवर्धनः ३

सुवनादिष्वियस्य यस्य तत्व पादं २८ हेलनमवज्ञां लाघायंन गणयित्वा अगणयित्वा उचितमेव तद्वैतदित्याह यस्त्वं स्वा-
नां पक्षं पुष्णासि इति तथा सः २९ एतत् पंचयसि [illegible] स्वयमेवावतीर्णोसि स्ववाक्यं तव पुत्रो भविष्यामीति यत्
तत्सत्यं ज्ञानं ज्ञानसाधनं सांख्यं चिकीर्षुः सन् ३०

यां प्रतोभवति मनः

तदेवं तेन भगवतीं गतिं प्राप्ता। पाठांतरे स एव तां गतिं प्राप्त इति ४६ इति तृतीये चतुर्विंशोऽध्यायः २४ पंचविंशे जनन्या। तत्वप्रष्टो बंधविमोचनं प्राहवाहपरं भक्तिलक्षणं कपिलः सुतः १ कपिलनाम्पिता मात्रे गूढभावनियंत्रिता योग माणिक्यमंजूषास्फुरमुद्घाटितः पुना २ ३ अनुवादपूर्वकं कापिलं योगं पृच्छति कपिल इति त्रिभिः तत्वानां संख्या ता गणकः सांख्यप्रवर्तक इत्यर्थः अत एव स्वयं जातः आत्मप्रज्ञप्तये आत्मज्ञापनाय पुंसां मध्ये वर्ष्मणः वृद्धस्य उत्त मस्येत्यर्थः सर्वयोगिनां मध्ये वरिम्णः वरस्य भावो वरिमा भवित प्रधानो यं निदं यावरिष्ठस्येत्यर्थः यद्वा वरीयस्त्वादित्यर्थः

इच्छाद्वेषविहीनेन सर्वत्र समचेतसा भगवद्भक्तियोगेन प्राप्तो भागवतीं गतिं ४६ इति श्री भागवते म हापुराणे तृतीयस्कंधे चतुर्विंशोऽध्यायः २४ परीक्षिदुवाच कपिलस्तत्वसंख्याता भगवानात्ममायया जा तः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणां १ न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयोगिनां विश्रुतौ श्रुतदेव स्य भूरि तृप्यंति मेऽसवः २ यद्यद्विधत्ते भगवान्स्वच्छंदात्मात्ममायया तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकी र्तय ३ श्रीशुक उवाच द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदि तः ४ मैत्रेय उवाच पितरि प्र[illegible]स्थिते ऽरण्यं मातुः प्रियचिकीर्षया तस्मिन्बिंदुसरेऽवात्सीत् भगवान्क पिलः किल ५ तमासीनमकर्माणं तत्वमार्गाग्रदर्शनं स्वसुतं देवहूत्याह धातुः संस्मरती वचः ६ श्रीराम

विश्रुतौ श्रवणे असवः इंद्रियाणि भूरि अत्यंतं न तृप्यंति श्रुतेन श्रवणेन दीव्यति द्योतते इति तथा यस्य स श्रुतदेवः श्रुतदेवो येन तस्यापि मे असवः इति संबंधः स्वानां छंदेन इच्छया आत्मा देहो यस्य सः यद्यत्कर्म विधत्ते तानि तानि कर्माणि कीर्तनार्हाणि अनुकीर्तय ३ यथा त्वं मां प्रचोदयसि एवं प्रचोदितः सन् तथा तत्प्रश्नानुसारेण आन्वीक्षिक्यां आत्मविद्यायां ४ बिंदुसरो बिंदुसरसि ५ तत्वमार्गस्याग्रं पारं दर्शयतीति तथा एषमानवित्तेगमं प्रचिषुरित्यादि धातुर्वचः ६ श्रीः श्रीः श्रीः

आपृच्छः। प्रव्रज्यातः वद्धा यथा त्वं गन्तुमापृच्छ्यवान् न तथा। नवस्यान्तं मयापि त्वमापृच्छ्य इत्यर्थः मयि संन्यस्तेन समर्पितेन कर्मणा प्रविशतापाशंप्री
त्वा विधृयान्तमसूतः इति मृते ३७ तत्र अमो परमात्मानं मात्मनि स्वस्मिन् आत्मना मनसा अन्वीक्ष्यमाणो अभयमोक्षं प्राप्स्यसि
३८ मात्रे देवहूत्यै शमनीं गुप्तमूलिनीं भयं तरिष्यति परमानंदं प्राप्स्यतीति चकारार्थः ३९ समुदितः सम्यगुक्तः सेन प्रदक्षि
णीकृत्य ४० मुनीनां व्रतं मौनमहिंसालक्षणं ४१ सदसतः परं यन्तस्मिन् ब्रह्मणि गुणावभासके निर्गुणे एकभक्त्या

गच्छ कामं मया पृष्टो मयि संन्यस्तकर्मणि जित्वा सुदुर्जयं मृत्युम् अमृतत्वाय मां भज ३७ मामात्मानं स्वयंज्यो
तिः सर्वभूतगुहाशयं आत्मन्ये[illegible]मनो वीक्ष्य विशोकोभयमृच्छति ३८ मात्रे अध्यात्मिकीं विद्यां शमनीं
सर्वकर्मणां वितरिष्ये यया चासौ भयं चातितरिष्यति ३९ मैत्रेय उवाच ॥ एवं समुदितस्तेन कपिले
न प्रजापतिः दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ४० व्रतं स आस्थितो मौनमात्मैकशरणो मुनिः
निःसंगो व्यचरत्क्षोणीमनग्निरनिकेतनः ४१ मनो ब्रह्मणि युंजानो यत्तत्सदसतः परं गुणावभासे विगु
णे एकभक्त्यानुभाविते ४२ निरहंकृत निर्ममश्च निर्द्वंद्वः समदृक् स्वदृक् प्रत्यक्प्रशान्तधीर्धीरः प्रशान्
तोर्मिरिवोदधिः ४३ वासुदेवेन भगवति सर्वज्ञे प्रत्यगात्मनि परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः
४४ आत्मानं सर्वभूतेषु भगवन्तमवस्थितं अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ४५ श्रीरामः

अव्यभिचारिण्या अनुभाविते परोक्षीकृते ४२ अतो देहाद्यहंकारादिरहितः अत एव निर्द्वंद्वः शीतोष्णाद्यनाकुलः सम
गभेदः आह किं तु स्वदृक् स्वयमेव पश्यन् प्रत्यक्प्रशान्तः प्रशान्ता विक्षेपरहिता धीर्यस्य तदेव विधिविकल्पितोपा
धिनिवृत्तिमुक्त्वा परमेश्वरपदप्राप्तिमाह वासुदेव इति त्रिभिः ४३ अतो चाजीवस्यात्मनि लब्ध आत्मा चित्तं येन य
तः मुक्तबंधनमज्ञानं यस्य लब्धात्मतामेवाह आत्मानमिति ४५

यथा च विना संयमेन पुरुषार्थस्य सिद्धिस्तद्दर्शयति अहंममेति त्रिभिः मलैर्वीतं विरहितं यदा शुद्धं मनो भवति मनःशुद्धेर्ल
क्षणमाह अदुःखमिति १६ निरन्तरं निर्भेदं अणिमानं सूक्ष्मं अखण्डितं अपरिच्छिन्नं १७ हतौजसं क्षीणबलं १८ मनः
शुद्धौ च भक्तिरेवान्तरंगसाधनमित्याह अस्य सर्वस्यापि सत्संगो मूलमित्याह प्रसंगमिति अपावृतं निरावरणं साधूनां ल
क्षणमाह तितिक्षव इति चतुर्भिः साधवः शास्त्रानुवर्तिनः साधुः सुशीलत्वं भूषणं २० तापा एतान् आध्या

अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः वीतं यदा मनः शुद्धमदुःखमसुखं समं १६ तदा पुरुष आत्मा
नं केवलं प्रकृतेः परं निरन्तरं स्वयंज्योतिरणिमानमखण्डितं १७ ज्ञानवैराग्ययुक्तेन भक्तियोगेन चात्म
ना परिपश्यत्युदासीनं प्रकृतिं च हतौजसं १८ नियुज्यमानया भक्त्या भगवत्यखिलात्मनि सदृशो
स्ति शिवः पन्था योगिनां ब्रह्मसिद्धये १९ प्रसंगमजरं पाशमात्मनः कवयो विदुः स एव साधुषु कृतो मोक्ष
द्वारमपावृतं २० तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनां अजातशत्रवः शान्ताः साधवः साधुभूष
णाः २१ मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढां मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः २२ मदा
श्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च तपन्ति विविधास्तापा नैतान्मद्गतचेतसः २३ त एते साधवः सा
ध्वि सर्वसंगविवर्जिताः संगस्तेष्वथ ते प्रार्थ्यः संगदोषहरा हि ते २४ सतां प्रसंगान्मम वीर्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति २५

त्मिकादयो न तपन्ति न बाधयन्ति कुतः मद्गतं चेतो येषां तान् २३ ये तादृशैर्निरूपितैस्ते साधव इत्यर्थः तत्संगस्य मत्संगतामु
पपादयति सतामिति वीर्यस्य सम्यग्वेदनं यासु ताः वीर्यसंविदः हृत्कर्णयोः रसायनाः सुखदाः तासां जोषणात् सेवनात् अप
वर्गो अविद्यानिवृत्तिः वर्त्म यस्मिन् तस्मिन् हरौ प्रथमं श्रद्धा ततो रतिः ततो भक्तिः अनुक्रमिष्यति क्रमेण भविष्यतीत्यर्थः २५

44

असतामिन्द्रियाणां समर्थनात् विषयाभिलाषात् निर्विण्णाऽस्मि येन संभाव्यमानेन प्रपद्यमाणेन ७ पारं गमयतीति पारगं त्वमेव अन्धस्य चक्षुर्भूयाल्लब्धं त्वदनुग्रहाज्जन्मना मत्वेनाभावेति तत्प्रपंचयति य इति ८ स भवानाद्यः कारूप उदितः सूर्यो यथा ९ अपाक्रष्टुं अपनेतुं कोसौ संमोहस्तमाह एतस्मिन्देहादौ त्वयैव योजितो योसौ अहं ममेत्यवग्रहः द्वितीय इति श्लोः उत तत्कार्यरागादिग्रहणार्थः १० प्रकृते पुरुषस्य च जिज्ञासया त्वामहं शरणं गतासती नमामीत्यन्वयः कुठारेष्ठ

देवहूतिरुवाच॥ निर्विण्णा नितरां भूमन्नसदिन्द्रियतर्पणात् येन संभाव्यमानेन प्रपन्नान्धं तमः प्रभो ७ तस्य त्वं तमसोऽन्धस्य दुःपारस्याद्य पारगं सच्चक्षुर्जन्मनामन्ते लब्धं मे त्वदनुग्रहात् य आद्यो भगवान्पुंसामीश्वरो वै भवान् किल। लोकस्य तमसान्धस्य चक्षुः सूर्य इवोदितः ९ अथ मे देव संमोहमपाक्रष्टुं त्वमर्हसि योऽवग्रहोऽहं ममेत्येतस्मिन्संयोजितस्त्वया १० तं त्वां गताहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारं जिज्ञासयाहं प्रकृतेः पुरुषस्य नमामि सद्धर्मविदां वरिष्ठं ११ मैत्रेय उवाच। इति स्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्धनं धियाभिनन्द्यात्मवतां सतां गतिर्बभाष ईषत्स्मितशोभिताननः १२ श्रीभगवानुवाच॥ योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च १३ तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे ऋषीणां श्रोतुकामानां योगं सर्वाङ्गनैपुणं १४ चेतः खल्वस्य बन्धाय मुक्तये चात्मनो मतं गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये १५ श्रीः श्रीः श्रीः

तारं ११ अपवर्गवर्धनं मोक्षे रतिजनकं ईषत्स्मितेन शोभितमाननं यस्य आध्यात्मिकः आत्मनिष्ठः यत्र यस्मिन् १३ तत्र सर्वाङ्गनैपुण्यं चितं यं यमाधीनमिति दर्शयन्नाह चेत इति अस्यात्मनो जीवस्य गुणेषु विषयेषु पुंसि परमेश्वरे रागो व-
रक्तं मोक्षाय १५

भक्तेर्गरीयस्त्वमुपपादयति नैकात्मतामिति पंचभिः एकात्मतां सायोज्यं मोक्षं मदर्थमीह क्रिया येषां प्रसज्य आस क्तिं कृत्वा पौरुषाणि वीर्याणि ३३ प्रसन्नानि वक्त्राणि अरुणानि लोचनानि च येषु तैर्मद्रूपैः साकं सह नित्यपरमेश्व रानुभवसुखवक्त्रा वि(शे)कामिति भावः ३४ आत्मानं दत्त्वैव स्वरूपं भवतीत्याह तैरिति दर्शनीया मनोहरा अवयवा मु खनेत्रादयो येषु तैर्हृतः आत्मा चित्तं येषां हृता अक्लिष्टा प्राणाश्चेन्द्रियाणि येषां तान् भजत अनिच्छतः सूक्ष्मां तानां नपि अणवीं गतिं प्रयुङ्क्ते प्रापयति कैः साधनैर्हृतात्मनः उदारैर्विलासादिभिः तत्र विलासो लीला वामो मनोहरः सूक्तं मधु रं भूषणं ३५ विभूत्यादिकं च तत्राधिकमित्याह अथो अविद्यानिवृत्त्यनन्तरं विभूतिं सत्यलोकादिगतां भोगसंपत्तिं अ

नैकात्मतां मे स्पृहयन्ति केचित् मत्पादसेवाभिरता मदीहाः येऽन्योऽन्य भागवताः प्रसज्य सभाजयन्ते मम पौरु षाणि ३३ पश्यन्ति ते मे रुचिराण्यम्ब सन्तः प्रसन्नवक्त्रारुणलोचनानि रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृ हणीयां वदन्ति ३४ तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः हृतात्मनो हृतप्राणांश्च भक्ति रनिच्छतो गतिमण्वीं प्रयुङ्क्ते ३५ अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तं श्रियं भागवतीं वा स्पृहयन्ति भद्रां परस्य मे तेऽश्नुवते तु लोके ३६ न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्ति नो मेऽनिमिषो लेढि हेतिः येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टं ३७

णिमादि यदष्टांगमैश्वर्यं अनुवृत्तिमनु भक्तिः स्वत एव प्राप्तामपि भागवतीं च श्रियं वैकुंठस्थां संपत्तिं अस्पृहयं तीनेयद्यपि न स्पृहयन्तीत्यर्थः तथापि लोके वैकुंठे अश्नुवते प्राप्नुवन्त्येवं नन्वेवं तर्हि लोकत्वाद्विनाशात्स्वर्गा दिवन्नाशे भोग्यानां कदाचिद्विनाशः स्यात् तत्राह ३८ हे शान्तरूपे शान्तरूपे शुद्धसत्त्वे तद्रूपे वैकुंठे मत्प राः कदाचिदपि न नङ्क्ष्यन्ति भोगहीना न भवन्ति अनिमिषो मोहेति मदीयं कालचक्रं च मा लेढि तान्न ग्रसती ति तत्र हेतुः येषामिति सुत इव स्नेहविषयः सखेव विश्वासात्पदं गुरुरिवोपदेष्टा सुहृदिव हितकारी इष्टं दैव

ततः किमत आह मद्रचनया स्पृष्टादिलीलातस्या अनुचिंतया भक्त्या ऐंद्रियात्सुखाज्जातविरागः सन् दृष्टश्रुता
न् ऐहिकामुष्मिकान् ततो यत्त उद्युक्तः सन् चित्तस्य ग्रहणे यतिष्यति ऋजुभिः भक्तिप्रधानत्वादनायासैः २५ ततो देवप्रकृ
तेर्गुणानामसेवया ज्ञानादिभिश्च अयं जीव इहैव देहेन मामेव स्वं प्राप्नोति २६ काचिदिति का चिद्युचितेत्यर्थः उचिता यो
ग्या तत्रापि मम स्त्रियाः कीदृशी गोचरा योग्या निर्वाणं मोक्षात्मकं तव पदं स्वरूपं अन्वाश्नवै अनेनैव सर्वात्मना प्राप्स्या
मि अंजसा त्विति पाठे अहमित्यस्य संबंधः २७ भगवद्बाणः यो भगवंतं लक्षीकरोतीत्यर्थः यतः यस्माद्योगात् २८ विजा
नीहि विशेषेण ज्ञापय सुखमनायासेन २९ इत्थं मातुरर्थं प्रयोजनं विदित्वा जातस्नेहः तत्र हेतुः यत्र यस्यां तन्वा देहेनाविर्भूतः
तत्त्वान्याम्नायंते अनुक्रम्यंते यस्मिन् किं तत् यत्सांख्यं प्रवदंति तं प्रोवाच भक्तिवितानं च योगं च ३० काचित्त्वय्युचिता भक्ति

भक्त्या पुमान्जातविराग ऐंद्रियात् दृष्टश्रुतान्मद्रचनानुचिंतया चित्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योग
मार्गैः २५ असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभितेन योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमि
हावरुंधे २६ देवहूतिरुवाच ॥ काचित्त्वय्युचिता भक्तिः कीदृशी मम गोचरा यया पदं ते निर्वाणमंजसान्वाश्न
वा अहं २७ यो योगो भगवद्बाणो निर्वाणात्मंस्त्वयोदितः कीदृशः कति चांगानि यतस्तत्त्वावबोधनं २८ तदेतन्मे वि
जानीहि यथाहं मंदधीर्हरे सुखं बुध्येय दुर्बोधं योषा भवदनुग्रहात् २९ मैत्रेय उवाच ॥ विदित्वार्थं कपिलो मातु
रित्थं जातस्नेहो यत्र तन्वाभिजातः तत्त्वाम्नायं यत्प्रवदंति सांख्यं प्रोवाच वै भक्तिवितानयोगं ३० श्रीभगवानुवा
च देवानां गुणलिंगानामानुश्रविककर्मणां सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ३१ अनिमित्ता भागवती भक्तिः
सिद्धेर्गरीयसी जरयत्याशु या कोशं निगीर्णमनलो यथा ३२

रिति पृष्टमुत्तमां भक्तिं लक्षयति गुणा विषया लिंग्यंते ज्ञाप्यंते यैस्तेषां देवानां द्योतनात्मकानामिंद्रियाणां तदधिष्ठातृणां चा सत्त्वे सत्त्व
मूर्तौ हरावेव या वृत्तिः सा भक्तिः सिद्धेर्मुक्तेरपि गरीयसीत्युत्तरेणान्वयः कथंभूता अनिमित्ता निःकामा स्वाभाविकी अयत्नसिद्धा
तेषामेवंविधं ज्ञानमोद्देशेनाह गुरोरुच्चारणमनुश्रूयते नेत्यनुश्रवो वेदः तदुक्तमानुश्रविकं तदेव कर्म येषां अत एव एकए
करूपं अविकृतं मनो यस्य पुंसः शुद्धसत्त्वस्येत्यर्थः मुक्तेश्च प्रसंगिकीभवंत्येव या भक्तिः कोशं लिंगशरीरं जरयति स्वद्ग्धयतं

निगीर्णं भुक्तमन्नं जाठरोऽनलो यथा जरयति ॥ ३२ ॥

आत्मैव पुरुषः कोसौ आत्मा प्रत्यक् प्रतिलोमं धाम स्फूर्तिर्यस्य पराक्प्रवृत्तं व्यावर्तयतीति अनादिरिति संसारित्वपक्षं
व्यावर्त्तयति प्रकृतेः परः अन्यः असंगः जन्मादिगुणास्तैर्वा षैरपि निर्गुणः मीमांसकाद्यभिमतं ज्ञानविषयत्ववार
यति स्वयंज्योतिः अनेनैव प्रभावहेतुमपि पुरुषस्य प्रकृतेः परत्वमपि सिद्धं ३ अत्रावरणविक्षेपशक्तिभेदेन संस
रतिजीवः यस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादिकरोति स प्रकृतिर्द्विविधा तत्रावरणशक्त्या सैव जीवोपाधिरविद्या वि
क्षेपशक्त्या तया सैव माया परमेश्वरी पुरुषश्च जीवेश्वररूपेण द्विविधः तत्र यः प्रकृत्यविवेकेन संसरति स जीवः यस्तु
प्रकृतिं वशीकृत्य विश्वसृष्ट्यादिकरोतीति परमेश्वरः तत्र प्रकृत्यविवेकेन जीवस्य संसारप्रकारमाह स एष इति पं
चभिः सूक्ष्मां अव्यक्तां दैवीं देवस्य विष्णोः शक्तिं लीलया उपगतां यदृच्छयैवाभ्यपद्यतेत्यन्वयः तस्य लीलामाह ४

अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः प्रत्यक्धामा स्वयंज्योतिर्विश्वं येन समन्वितं ३ स एष प्रकृतिं सूक्ष्मां
दैवीं गुणमयीं विभुः यदृच्छयैवोपगतामभ्यपद्यत लीलया ४ गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्र
जाः विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ५ एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् कर्मसु क्रि
यमाणेषु गुणैरात्मनि मन्यते ६ तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतं भवत्यकर्तुरीशस्य साक्षिणो
निर्वृतात्मनः ७

गुणैरिति ज्ञानं गूहति आवृणोतीति ज्ञानगूहा तया तथा च श्रुतिः अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयं
तीं सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति मुमुहे आत्मानं विस्मृतवान् ५ पराभि
ध्यानं प्रकृत्यध्यासः तेन प्रकृतेः गुणैः कर्मभिर्वधः इत्यस्य अपरतंत्रस्यैव कर्मसु क्रियमाणेषु कर्तृत्वमात्मनि म
न्यते ६ तदिति कर्तृत्वाभिमानमेव अस्य पुरुषस्य साक्षिमात्रत्वादकर्तुरेव सतः कर्मभिर्वधः इत्यस्य अपरतंत्रस्यैव कर्म
वंधकृतं भोगो पारतन्त्र्यं निर्वृतात्मनः सुखात्मकस्यैव संसृतिः जन्ममृत्युप्रवाहः प्रकृत्यविवेककृतमेतत्सर्वं भवतीत्यर्थः ७

इमामिति ताभ्यां उभयापितं लोकद्वयप्राप्तिनं श्रीं आत्मानं सोपाधिकं आत्मानमनुये पुत्रकलत्रादयः ये च पश्चाद्
यः रायः धनानि अन्यांश्च परिगृहान् मृत्योः संसारात् अतिपारये अतितारयामि अभक्तानां न कथंचिदपि मोक्ष इ
त्याह नेति मद्भगवतोन्यद्भगवतो मत्तो विना सर्वभूतानां आत्मनः भगवदादिविशेषणत्रयेणासामर्थ्यं निरपेक्षत्वं हिते
कारीत्वं चोक्तं ऐश्वर्यं स्फुटयति मद्भयादिति ४० अतिश्च भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्र
श्च मृत्युर्धा मद्भजनादेव मोक्ष इत्यत्र सदाचारं प्रमाणयति ज्ञानेति उपसंहरति ४२ एतावानिति मय्यर्पितं सन्मनः स्थिरं भव

इमं लोकं तथैवामुमात्मानमुभयायिनं आत्मानमनु ये चेह ये रायः पशवो गृहाः ३८ विसृज्य सर्वानन्यांश्च मामेवं
विश्वतोमुखं भजंत्यनन्यया भक्त्या तान् मृत्योरतिपारये ३९ नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् आत्मनः
सर्वभूतानां भयं तीव्रं निवर्तते ४० मद्भयाद्वाति वातोयं सूर्यस्तपति मद्भयात् वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति म
द्भयात् ४१ ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयं ४२ एतावानेव
लोकेस्मिन् पुंसां निःश्रेयसोदयः तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरं ४३ इति श्रीभागवते महापुराणे तृ
तीयस्कंधे पंचविंशोध्यायः २५ श्रीभगवानुवाच अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् यद्विदित्वा विमुच्ये
त पुरुषः प्राकृतैर्गुणैः १ ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं यदाहुर्वर्णये तत्ते हृदयग्रंथिभेदनं २॥

तीतियत् एतावानेव ४३ इति तृतीये पंचविंशोध्यायः २५ षड्विंशे पुत्रकृत्योस्तु विवेलापोपवर्ण्यते सांख्येन सर्वभावानां
जन्मलक्षणभेदतः १ धात्रा पुत्राय यत्प्रोक्तं तंत्रे मित्रासुते न यात् मात्रे सांख्यं द ध्यात्मप्राधान्येनाहतत्त्ववित् २ तत्त्वाम्ना
यं यत्प्रवदंति सांख्यमित्यत्र सांख्यभक्तियोग इति च प्रमुपक्षिप्तं तत्र भक्तिमुक्त्वा इदानीं सांख्यमाह अथेति न तु मुक्तेरा
त्मज्ञानादेव न तु तत्त्वलक्षणज्ञानात् तमेव विदित्वा अतिमृत्युमेति इति श्रुतेः अत आह ज्ञानमिति १ आत्मदर्शनरूपं ज्ञा
नं अत एव हृदयग्रंथिभेदनं अहंकारनिवर्तकं निःश्रेय सप्रयोजनाय यदाहुस्तत्ते वर्णयामि तत्त्वलक्षणादेव विविक्ता

यः कालः पंचविंशकः प्रकृतेरेवावस्थाविशेष इत्यर्थः। १५ एके तु पौरुषं पुरुषस्येश्वरस्य प्रभावं विक्रमं कालमाहुः तमेव का
लं देशलक्षयति यतो भयं भवति कस्य प्रकृतिं ईयुषिः प्राप्तस्य अत एव देहे अहंकारेण विमूढस्य कर्तृजीवस्य अनेन स
हारकत्वेन लक्षितः स एव हेतत्वेन लक्षयति प्रकृतेरिति १६ कोसौ भगवान तमाह अन्तः सर्वप्राणिनां यः पुरुषरूपेण
नियंतृत्वेन समन्वेति सम्यक् तद्विकाररहित एव अनुस्यूतवर्तते बहिश्च कालरूपेण एष भगवान् यद्वायः पुरुषः
ति प्रसिद्धः कालः स पंचविंशकः एके तु पुरुषस्य प्रभावं कालमाहुः प्रभावस्यैव लक्षणं १७ अन्तरिति पुरुषस्यैवको

एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह सन्निवेशो मया प्रोक्तो यः कालः पंचविंशकः १५ प्रभावं पौरुषं
प्राहुः कालमेके यतो भयं अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः १६ प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य
मानवि चेष्टा यतः स भगवान् काल इत्युपलक्षितः १७ अन्तः पुरुषरूपेण कालरूपेण यो बहिः समन्वे
त्येष सत्वानां भगवानात्ममायया १८ दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् आधत्त वीर्यं सासू
त महत्तत्वं हिरण्मयं १९ विश्वं [illegible] कूटस्थो जगदंकुरः स्वते[illegible] सापिबत्तीव्रमात्मप्रस्वापनं

लत्वेन हेतुः प्रकृतेरिति उभयथा विवक्षायां हेतुः अन्तरिति श्लोकसमान्वं तदेवं प्रकृतेश्चतुर्विंशतिभेदाः जीवश्च
रयोश्चैक्यविवक्षायां अतः पंचविंशति तत्वानि भवंति तयोर्भेदविवक्षायां षड्विंशति भवति १८ इदानीं तत्वानु
त्पत्तिपूर्वकं लक्षणमाहुः चतुर्भिः दैवात् जीवादृष्टात् क्षुभिता धर्मा गुणा यस्याः योनौ अभिव्यक्तिस्थाने प्रकृतौ
वीर्यं चिच्छक्तिं प्रकृतिर्महत्तत्वं प्रसूत महतः स्वमस्वरूपमाह हिरण्मयं प्रकाशबहुलं १९ विश्वाहंकारादि प्र
पंचं आत्मगतं स्वस्मिन् सूक्ष्मरूपेण स्थितं व्यंजयन् महान् तमो पिबत् कूटस्थः लयविक्षेपशून्यः आत्मान
प्रस्वापं प्रतीतिं नया यत्पूर्वं प्रलयसमये महता प्रकृतौ विलापयामास तदर्थः २० श्रीकृष्णार्पणमस्तु श्रीगः

ननु चैतन्यसमानाधिकरण्येनैव कर्तृत्वादिप्रतीतेः तस्यैवमङ्गीकृपत्तान्नेत्याह कार्यं शरीरं कारणमिन्द्रियं कर्तृ
दैवतादिवर्गः उद्भवापत्तौ पुरुषस्य प्रकृतिकारणं विदुः कूटस्थस्यास्य स्वतो विकाराभावात् प्रकृतिपरिणामभूतदे
हाद्यहंकारकृतमेव कर्तृत्वादिकमेवेत्यर्थः भोक्तृत्वेन पुरुषं कारणं विदुरिति अस्यायं भावः पयस्यहंकारगत
मेव कर्तृत्वादिकं भोक्तृत्वं च तथापि जडविकारस्य जडावसानत्वादुपाधिप्राधान्यं भोगस्य चिदवसानत्वात् उ
पुष्यितप्राधान्यमिति तदेवं संसारिणं पुरुषं तद्धेतुं प्रकृतिं च ज्ञात्वा इदानीं जगत्कारणमीश्वरं तत्र प्रकृतिचतुष्ट
पुरुषयोः ९ तत्र प्रकृतिं प्रकृतेरिति ८ अस्य विश्वस्य सदसच्च स्थूलसूक्ष्मं च कार्यं यदात्मकं तयोः प्रकृति

कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः। भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परं ८ देवहूति
रुवाच ॥ प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ब्रूहि कारणयोरस्य सदसच्च यदात्मकं ९ श्रीभग
वानुवाच। यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकं प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् १० पंच
भिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ११ महाभूतानि पंचैव भू
रापोऽग्निर्मरुन्नभः तन्मात्राणि च तावन्ति गंधादीनि मतानि मे १२ इंद्रियाणि दश श्रोत्रं त्वग्दृग्रसनना
सिकाः वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते १३ मनो बुद्धिरहंकारश्चित्तमित्यन्तरात्मकं चतुर्धा लक्ष्

तिं लक्षयति यत्प्रधानं तदेव प्रकृतिं प्राहुः किं तत्प्रधानं स्वतोऽविशेषं विशेषवत् विशेषस्याश्रयः तर्हि किं ब्रह्म त्रिगु
णं किं महत्तत्त्वादिना अव्यक्तं अकार्यं किं कालादि नेत्यसदसदात्मकं कार्यकारणात्मकं किं जीवः प्रकृति ने नित्यं अन्येषा
तत्त्वानं लक्षणा वक्तुं तानि गणयति पंचभिरित्यादि सांख्यभेदेन एतच्चतुर्विंशति यस्मिन् गणे तं गणं प्राधानिकं प्रधानका
र्यात्मकं ब्रह्म विदुः १० द्विपयोति महाभूतानि इति त्रिभिः ११ तावन्ति पंचैव १२ अन्तरात्मकमंतःकरणं लक्षणरूपया व्य

उपास्य इत्यस्य चानिरुद्ध इत्येकैः शारदेन्दीवरः शरत्कालीनं इन्दीवरं नीलोत्पलं तद्वद्विवर्णश्यामं यत्त्वं ध्याने संराध्यं वशीकर्तव्यो
ग्यः दुर्ग्रहत्वात् २८ बुद्धेरुत्पत्तिपूर्वकं लक्षणमाह तैजसादिति द्वाभ्यां हे सति द्रव्यस्फुरणरूपं विज्ञानमिति चित्त
वृत्त्यर्थमुक्तं इन्द्रियाणामनुग्रह इति सविकल्पज्ञानं हृषीकाणामधीश्वरमिति यदुक्तं तत्तु निर्विकल्पज्ञाने
द्रव्यस्फुरणमेव प्रपञ्चयन्नाह संशयादिः २९ विपर्यासो मिथ्याज्ञानं निश्चयः प्रमाणज्ञानं स्वापो निद्रा प्रमाणविपर्यय
विकल्पनिद्रास्मृतय इति पातञ्जलोक्तेः ३० इन्द्रियाणामुत्पत्तिमाह तैजसाहङ्कारात्ज्ञानेन्द्रियाणां वैकारिकत्व

यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरं शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः २९ तैजसात्तु वि
कुर्वाणाद्बुद्धितत्त्वमभूत्सति द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः ३० संशयोऽथ विपर्यासो निश्च
यः स्मृतिरेव च स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३१ तैजसानीन्द्रियाण्येव क्रियाज्ञानवि
भागशः प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ३२ तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदि
तात् शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगम् ३३

ज्ञोकानि इत्यर्थमेवकारः द्विविधान्यपीन्द्रियाणि तैजसान्येवेत्यर्थान्वयः तत्र हेतुः प्राणस्येति हि यस्मात् प्राणस्य क्रिया
शक्तिः बुद्धेश्च विज्ञानशक्तिता हि तत् प्राणस्य तैजसत्वात् क्रियाशक्तिमतामिन्द्रियाणां तैजसत्वं तथा बुद्धेः तैजसात्तदीय
ज्ञानशक्तिमतामपीन्द्रियाणां तैजसत्वमित्यर्थः तन्मात्रोत्पत्तिपूर्वकमाकाशादिमाह भूतोत्पत्तिलक्षणं चाह ३२ ताम
सादिति पञ्चभिः श्रोत्रं तु शब्दगमित्यादिभिर्विषयोत्पादनं तत्तत्सम्बन्धमात्रकथनं तेन नेन्द्रियोत्पत्तिः प्रागेवोत्पन्नत्वात् शब्दं
गच्छति प्राप्नोतीति शब्दगं शब्दस्य लक्षणमाह ३३ अर्थाश्रयत्वं अर्थवाचकत्वं द्रष्टुर्लिङ्गत्वं वाच्यमवच्छेदकं तिरस्कव्यज्ञाप
स्याणो



३४ तेकारणान्वयात् ३४
श्रीकृष्णायनमः ॥

असंगाद्भुतव्यूहोपासनामाह यत्तदिति सर्वागमप्रसिद्धत्वमाह स्वच्छं विशदं रागादिरहितं भगवतः.. उपलब्धिस्थानं
अतएव वासुदेवाख्यं यदाहुः अयमर्थः अधिभूतरूपेणात्स्येवमहानिति सञ्ज्ञा अध्यात्मरूपेण चित्तमिति उपास्यरूपे
णवासुदेवइति अधिष्ठितानुतस्य क्षेत्रज्ञः एवमहंकारे संकर्षण उपास्यः रुद्रोधिष्ठाता मनस्यनिरुद्ध उपास्यः॥
चन्द्रोधिष्ठाता बुद्धौ प्रद्युम्न उपास्य ब्रह्माधिष्ठातेति ज्ञातव्यं २१ स्वच्छत्वं भगवद्बिंबग्राहित्वं अविकारित्वं लयविक्षे
पराहित्यं अपां प्रकृतिः फेनतरंगादिरहिता वस्थापराभूत्संसर्गात् प्राक्तनीयस्ता यथामधुरत्वशान्तलाचत्वे

यत्तत्सत्त्वगुणं स्वच्छं शान्तं भगवतः पदं यदाहुर्वासुदे[illegible]चित्तं तन्महदा[illegible]कं २१ स्वच्छत्वमविकारित्वं
शान्तत्वमिति चेतसः वृत्तिभिर्लक्षणं [illegible]कृतिः परा २२ महत्त[illegible]द्विकुर्वाणाद्भगवद्वीर्यसंभ
वात् क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत २३ वैकारिकस्तैजस[illegible]यतो भवः मनसश्चेन्द्रि
याणां च भूतानां महतामपि २४ सहस्रशिरसं साक्षाद्यमनन्तं प्रचक्षते संकर्षणाख्यं पुरुषं भूतेन्द्रियम
नोमयं २५ कर्तृत्वं कारणत्वं च कर्तृत्वं चेति लक्षणं शान्तघोरविमूढत्वमिति वा स्यादहंकृते २६ वैका
रिकाद्विकुर्वाणान्मनस्तत्त्वमजायत यत्संकल्पविकल्पाभ्यां वर्तते कामसंभवः २७ श्रीरामायनमः

हदित्यर्थः २३ अहंकारस्योत्पत्तिपूर्वकं लक्षणमाह महत्तत्त्वादिति वचनैः क्रियाशक्तिर्यस्य सः क्रियाशक्तिः त्रैविध्यमा
ह वैकारिक इति २३ तस्य कार्यमाह यतः यस्मात् मनआदीनाम् उत्पत्तिः तस्मिन्नुपास्यव्यूहमाह सहस्रशिरसमि
ति २४ कर्तृत्वं देवतारूपेण करणत्वमिन्द्रियस्वरूपेण शान्तत्वादिकं तत्कारणगुणत्रयरूपेण २५ मनस उत्पत्ति
पूर्वकं लक्षणमाह वैकारिकादिति द्वाभ्यां संकल्पश्चिंतनं विकल्पो विशेषचिंतनं यस्य मनसः संकल्पविकल्पाभ्यां
कामसंभवो वर्ततइति कामरूपावृत्तिर्लक्षणेनानेनानुप्रद्युम्नव्यूहोत्पत्तिः तस्य संकल्पादिकार्यत्वाभावात् २७

क्लेदनं अर्धीशीयूकरणं तृप्तिः तृप्तिदातृत्वं प्राणनं जीवनं अपोमयः प्राणा इति श्रुतेः आप्यायनं तद्वृद्ध्यनिवर्तनं उद्दनम्
क्लेदनं अर्धीशीयूकरणं तृप्तिः तृप्तिदातृत्वं प्राणनं जीवनं अपोमयः प्राणा इति श्रुतेः आप्यापनं तद्वृद्ध्यनिवर्तनं उद्दनम्
द्रूकरणं अदनमिति पाठे स एवार्थः भूयस्त्वं कूपादावुद्धृतस्यापि पुनः पुनरुद्गमः ४३ गंधगुणः गंधप्राप्नोति ४४ करंभो
मिश्रगंधः यथा व्यंजनादीनां संस्कारैः पूतिर्दुर्गंधः सौरभ्यं कर्पूरादेः शांतत्वं शतपत्रादेः उग्रो लशुनादेः संसर्गिणां द्रव्या
वयवानां वैषम्यात् स एवं विभिद्यते स गंध इत्यर्थः ४५ ग्रहणो भावनं प्रतिमादिरूपेण साकारता पादानं स्थानं जला
दिविलक्षणाय नैरपेक्ष्येण स्थितिः धारणं जलाद्याधारत्वं सत्ता आकाशादीनां विशेषणम् अवच्छेदकत्वे सर्वेषां सत्वा

क्लेदनं पीडनं तृप्तिः प्राणानाप्यायनोदनं तापापनोदो भूयस्त्वं अंभसो वृत्तयस्त्विमाः ४३ रसमात्राद्विकु
र्वाणादंभसो दैवचोदितात् गंधमात्रमभूत्तस्मात् पृथ्वी घ्राणस्तु गंधगः ४४ करंभपूतिसौरभ्यशांतोग्राम्ला
दिभिः पृथक् द्रव्यावयववैषम्याद्गंध एको विभिद्यते ४५ भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणं स
र्वसत्वगुणोद्भेदः पृथिवी वृत्तिलक्षणं ४६ नभोगुणविशेषोऽर्थो यस्य तच्छ्रोत्रमुच्यते वायोर्गुणविशेषो
ऽर्थो यस्य तत्स्पर्शनं विदुः ४७ तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते अंभोगुणविशेषोऽर्थो यस्य तद्र
सनं विदुः ४८ भूमेर्गुणविशेषोऽर्थो यस्य स घ्राण उच्यते परस्य दृश्यते धर्मो ह्यपरस्मिन् समन्वयात् ४९

नां ब्रह्मणो गुणानां च पुंस्त्वादीनां मुद्भेदः परिणामविशेषैः प्रकटीकरणं श्रोत्रादीनां विशेषणम् अवच्छेदकत्वं सर्वेषां
शब्दादिग्राहकत्वमुक्तं तेषां च लक्षणं तद्देवाह पंचभिः श्लोकार्द्धैः ४६ नभसो गुणविशेष शब्दो यस्यार्थो विषयः ४७ ४८
गुणविशेष शब्दस्याच्छत्वं दर्शयति परस्य कारणस्य धर्मः शब्दादि अपरस्मिन् कार्ये वाय्वादौ कारणान्वयात् दृ
श्यते अतो भावानामाकाशादीनां विशेषगुणाः सर्वोपि शब्दादिर्भूमावेवोपलभ्यते ४९ श्रीकृष्णाय नमः॥

छिद्रदातृत्वं च बहिरन्तरव्यवहारास्पदत्वं आत्मनः आरामादीनां धिष्ण्यमाश्रयत्वं नाड्यादिछिद्ररूपेणावृत्तिः कार्यमेवलक्ष
णं वृत्तिलक्षणं एवमुत्तरत्रापि प्रथमेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेन तन्मात्रलक्षणं तृतीयेन महाभू
तलक्षणमित्यवसंधेयं कार्या त्वकस्पर्शसंग्रहसम्मुखग्रहणे यतः पुंस्त्वनियतलिंगत्वात् यथास्पर्शसंग्रहस्ततोऽभ
वतीति शेषः शब्दतन्मात्रादित्यादि तन्मात्राणामुत्तरोत्तरान्वयार्थमुक्तं स्पृष्टत्वस्वरूपलक्षणमित्यर्थः नभस्वतो वायो
तन्मात्रत्वं च ३६ चालनं वृक्षशाखादेर्व्यूहनं मेलनं तृणादेः आमिसंयोगः द्रव्यस्य गंधवतो घ्राणं प्रति नयनं शैत्यादि
मतः स्पर्शनं प्रति पत्तिशब्दस्य श्रोत्रप्रतीतितत्त्वं सर्वेन्द्रियाणामात्मत्वमुपोद्बलकत्वं कर्मणा कार्येणाभिलक्षणं भावे

अर्थाश्रयत्वं शब्दस्य दृष्टलिंगत्वमेव च तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ३४ भूतानां छिद्रदातृत्वं
बहिरन्तरमेव च प्राणेन्द्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणं ३५ नभसः शब्दतन्मात्रात्कालगत्या वि
कुर्वतः स्पर्शोऽभवत्ततो वायुस्त्वक्स्पर्शस्य संग्रहः ३६ मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च एतत्स्प
र्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ३७ चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः सर्वेन्द्रियाणामात्मत्वं
वायोः कर्माभिलक्षणं ३८ वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् समुत्थितं ततस्तेजश्चक्षूरूपोप
लम्भनं ३९ द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ४०
द्योतनं पचनं पानमदनं हिममर्दनं तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ४१ रूपमात्राद्विकुर्वाणात्ते
जसो दैवचोदितात् रसमात्रमभूत्तस्मादम्भो जिह्वा रसग्रहः ४२ कषायो मधुरस्तिक्तः कट्वम्ल इति नैक
धा भौतिकानां विकारेण रस एको विभिद्यते ४३

ल्पस्य ३७ कर्मणाभिलक्षणमिति विग्रहे हेतुकरणे द्रव्याकृतित्वं द्रव्यस्याकारसमर्पकत्वं गुणता द्रव्योपसर्जनेन प्रतीतिः शब्दस्य
नुस्यूतत्वेनैव प्रतीतिः प्रत्यक् द्रव्यस्य स्पर्शादेरपि स्वातन्त्र्येणैव प्रतीतिः रूपस्य तु नैवमिति तस्याविशेष उक्तः व्यक्तिसंस्थात्वं
द्रव्यस्य पासस्थासंनिवेशः सेव संस्था यस्य परिणामभया प्रतीतिरित्यर्थः तेजस्तेजसे स्वमसाधारणत्वं ३९ द्योतनं प्रकाशनं
पचनं तंदुलादेः क्षुत्तृट् अशनापिपासा च तद्धरेण अदनं पानं च ४० जिह्वात्मेन्द्रियं रसो गृह्यते अनयेति रसग्रहः यु
द्वारसग्रहे हस्त्योर्भवतीति शेषः ४१ कषायादिभेदवर्णापि द्रष्टव्याः भौतिकानां संसर्गद्रव्याणाय एको मधुररस एव सन्नेवमने



भागवतटीकायां पत्रं ४३

ततो दिशः प्राविशन् आदित्या वेदनकेशाः स्वराट् इंद्रः हरिर्विष्णुः आभृतं जातं ६० यद्युष्मादिषु हृदयमेवाधिष्ठानं गि
रांपतिर्ब्रह्मा चैत्यः क्षेत्रज्ञः अन्वयव्यतिरेकाभ्यां क्षेत्रज्ञं विविक्तुं सर्वेषां पुनः प्रवेशमाह यत्त इति नवभि विराट्

नाड्योस्य निरभिद्यंत ताभ्यो लोहितमाभृतं नद्यस्ततः समभवन्नुदरं निरभिद्यत ५९ क्षुत्पिपासे ततः स्या
तां समुद्रस्त्वेतयोरभूत् ६० अथास्य हृदयं भिन्नं हृदयान्मन उत्थितं मनसश्चंद्रमा जातो बुद्धिर्बु
द्धेर्गिरांपतिः ६१ अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोभवत् एते ह्यभ्युत्थिता देवा नैवास्योत्थापने श
कन् ६२ पुनराविविशुः खानि तमुत्थापयितुं क्रमात् वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट् ६३
घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट् अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट् ६४ श्रोत्रे
णा कर्णौ च दिशो नोदतिष्ठत्तदा विराट् त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् ६५ रेतसा शिश्नमाप
स्तु नोदतिष्ठत्तदा विराट् गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् ६६ हस्ताविंद्रो बलेनैव नोदतिष्ठत्त
दा विराट् विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् ६७ नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट्॥
क्षुत्तृड्भ्यामुदरं सिंधुर्नोदतिष्ठत्तदा विराट् ६८ हृदयं मनसा चंद्रो नोदतिष्ठत्तदा विराट् बुद्ध्या ब्रह्मापि
हृदयं नोदतिष्ठत्तदा विराट् ६९ रुद्रोभिमत्या हृदयं नोदतिष्ठत्तदा विराट् चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्रा

देहस्य बुद्धिर्देहं दृष्ट्वा तेन दर्शयन् साख्यानुकर्षेनस्य प्रयोजनमाह यथेति यद्वा अप्रथमं परमेश्वरे भक्तिस्ततो ऽ
न्यत्र विरक्तिः ततो योगप्रवृत्ताधीः एकाग्रचित्तं ततो यत् ज्ञानं तेन प्रत्यगात्मानं क्षेत्रज्ञं अखिलात्मानि कार्यं ७०

चतुर्णां तत्रान्वयात् यथाद्विषु यथा च भेदेन सर्वः आकाशोऽन्यावयवाभावात् एक एवेति एवं कारणोत्पत्तिमुक्त्वा कार्योत्पत्ति माह चतुर्णां सार्द्धैस्त्रिभिः एतान्यसंहत्य हत्यसम्मिलित्वा यदा स्थितानि तदा जगदादिरीश्वरः आविशत्तत्त्वेनेति च प्राधान्याभिप्रायेणोक्तं प्रवेशस्तु सर्वेष्वेव विवक्षितः ५० अनुविद्धेभ्यः क्षुभितेभ्यः यस्मादण्डादसौ विराट् पुरुष उदतिष्ठत् ५१ भगवतो रूपमिति पुरुषाभेदाभिप्रायेण तस्मिन्नध्यात्मादिविभागमाह ५२ हिरण्मयादिति त्रिभिः उत्थाय औदासीन्यं विहाय तमाविश्य अधिष्ठाय महांश्चासौ देवश्च खं छिद्रं वाण्या सह अभवत् ५३ नासे निरभिद्येतां प्राणो

अतो विशेषो भावानां भूमावेवोपलक्ष्यते एतान्यसंहत्य यदा महदादीनि सप्त वै ५० कालकर्मगुणोपेतो जगदादिरुपाविशत् ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् ५१ उत्थितं पुरुषं यस्मादुदतिष्ठदसौ विराट् एतदण्डविशेषाख्यं क्रमवृद्धैर्दशोत्तरैः ५२ तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः यत्र लोकवितानोऽयं रूपं भगवतो हरेः ५३ हिरण्मयादण्डकोशादुत्थाय सलिलेशयात् तमाविश्य महादेवो बहुधा निर्बिभेद खं ५४ निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् वाण्या वह्निरथो नासे प्राणोतो घ्राण एतयोः ५५ घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः तस्मात्सूर्यो व्यभिद्येतां कर्णौ श्रोत्रं ततो दिशः ५६ निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः तत ओषधयश्चासन् शिश्नं निर्बिभिदे ततः ५७ रेतस्तस्मादाप आसन् निरभिद्यत वै गुदं गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ५८ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ५९

तः प्राणेन उतः स एतः सन घ्राण एतयोर्नासिकयोरभवदित्यनुषंगः प्राणादनन्तरं वायुश्च प्राणोऽर्थ इति विशेषणं सर्वेन्द्रियेष्वपि द्रष्टव्यं निरभिद्येतां अन्यभिद्येतामिति पाठद्वयेऽपि एक एवार्थः ५९ श्रीरामाय नमः श्रीकृष्णाय नमः

सत्सेन निःकपटेभावेन प्रेम्णा अप्रसंगतः संगत्यागेनबलीयसा ईश्वरेर्पितेन ७ विविक्तशरणः एकांतवासी ८ असदाग्रहः अहंममताप्रकृतेःपुरुषस्यच दृष्टतत्त्वयेन तेनज्ञाने ९ निद्रास्वानिवृत्तावस्थानां निजाग्रदादीनियस्यसः अतएवदूरीभूतमन्यदर्शनंयस्य आत्मनाऽहंकारीवच्छिन्नेन आत्मानंशुद्धमुपलभ्य एकस्यैवावच्छेदानवच्छेदाभ्याकारणाकर्मत्वेदृष्टांतमाह चक्षुषाचक्षुःषच्छिन्नेनार्केणगगनस्थमर्कमिवएवमात्मदृक् शुद्धमात्मानंपश्यन्मुक्तलिंगानिरूपाधिकःसतिमिथ्याभूतेऽहंकारेसदाभाससद्रूपेणाभासमानंब्रह्मप्राप्नोतिशुद्धजीवस्वरूपाद्विशेषमाह सतःकारणस्यप्रधानस्यवंधुमधिष्ठानं असतःकार्यस्यच द्युरिवप्रकाशकंसर्वेषुकार्यकारणेषुअनुस्यूतंअद्वयं

सर्वभूतसमत्वेननिर्वैरेणाप्रसंगतः ब्रह्मचर्येणमौनेनस्वधर्मेणबलीयसा ७ यदृच्छयोपस्थितेनसंतुष्टोमितभुग्मुनिः विविक्तशरःशांतोमैत्रःकरुणआत्मवान् ८ सानुबंधेचदेहेस्मिन्नकुर्वन्नसद्ग्रहं ज्ञानेनदृष्टतत्त्वेनप्रकृतेःपुरुषस्यच ९ निवृत्तबुद्ध्यवस्थानोदूरीभूतान्यदर्शनः उपलभ्यात्मनात्मानंचक्षुषेवार्कमात्मदृक् १० मुक्तलिंगंसदाभासमसतिप्रतिपद्यते सतोबंधुमसच्चक्षुःसर्वानुस्यूतमद्वयं ११ यथाजलस्थआभासःस्थलस्थेनावदृश्यते स्वाभासेनयथासूर्योजलस्थोनदिविस्थितः १२ एवंत्रिवृदहंकारोभूतेंद्रियमनोमयैः स्वाभासैर्लक्षितोयेनसदाभासेनसत्यदृक् १३

यदिएवंअहंकारोयहितेनशुद्धब्रह्मप्रतिपत्तिंसदृष्टांतमाह यथेति ११ जलेस्थितआभासःसूर्यप्रतिबिंबोयदागृहांतर्वर्तिभित्त्यादौस्फुरतितदागृहकोणस्थितेपुरुषेभित्त्यादौस्थलेस्थितेनस्वाभासेनसूर्यप्रतिबिंबेनयथाप्रथमंजलस्थआभासोवदृश्यते लक्ष्यतेगगनस्थस्याग्रहणमध्येप्रतिबिंबयोगात् ध्यायर्थयथाज्ञाद्वः यथाचेत्पुर्वः यथाजलस्थेनदिविस्थितसूर्योलक्ष्यते १२ एवंभूतेंद्रियमनोमयैर्देहेंद्रियमनोभिरवच्छिन्नैःस्वाभासैःआत्मप्रतीतेर्बिंबैःत्रिगुणोहंकारःसंलक्ष्यते १३ एवंभूतेंद्रियमनोमयैर्देहेंद्रियमनोभिरवच्छिन्नैःस्वाभासैः आत्मप्रतीतेर्बिंबैः त्रिगुणोहंकारः संलक्ष्यते

कारणसंघाते विविच्य चिंतयेत् ७२ इति तृतीयस्कंधे षड्विंशोऽध्यायः २६ एवं विंशेतत सम्यग्बहुसाधयोगतः पुंप्रकृत्यो
विवेकेन मोक्षरीतिर्निरूप्यते १ विवेकज्ञानेन मोहमुपैयाद्ग्यितु ध्यार इत्येव पुरुषस्य पूर्वोत्तमं तं प्रकृत्या विवेकतः
संसारमनुसारयति प्रकृतिस्थो पितिरिभिः दे हस्थोपि नाज्यते न लिप्यते गुणैस्तत्व पुरुषस्य न्कृतैः सुखदुःखादि
भिः निर्गुणत्वाद कर्तृत्वं ततो विकारित्वं तस्मात् २ अनिर्वृतः सन् प्रकृतिसंगतैः सदसन्मिश्रयोः निषु देवतिर्यगाए
दिषु संसारपदवीं प्राप्नोति ननु दहेवमवासावत्वात्संसृतिः किं तन्निवृत्तिप्रज्ञासेन तत्राह अर्थे हीति ३ यतो विषयध्या

विराट् तद्देवपुरुषः सलिलाद्दुदितिष्ठन् यथा प्रसुप्तं पुरुषं प्राणेन्द्रियमनोधिपः अभवंति विना येन नोत्थाय
पितुमोजसो ७१ तमस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिंत
येत् ७२ इति श्रीभागवते महापुराणे तृतीयस्कंधे षड्विंशोऽध्यायः २६ श्रीभगवानुवाचः प्रकृतिस्थो
पि पुरुषो नाज्यते प्राकृतैर्गुणैः अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् १ स एष यर्हि प्रकृतेर्गु
णेष्वभिविषज्जते अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते २ तेन संसारपदवीमवशोऽभ्येत्यनिर्वृतः।
प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ३ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ध्यायतो विषया
नस्य स्वप्नेऽनर्थागमो यथा ४ अत एव शनैश्चित्तं प्रसक्तमसतां पथि भक्तियोगेन तीव्रेण विरक्त्या च नयेद्
वशं ५ यमादिभिर्योगपथैरभ्यसन् श्रद्धयान्वितः मयि भावेन सत्येन मत्कथाश्रवणेन च ६ सर्व

नमनर्थहेतुः अतो मनो नियंतव्यमित्याह अत एवेति ४ असतां इंद्रियाणां पथि विषयमार्गे तीव्रेण दृढेन विरक्त्या च तीव्र
वृत्त्या भक्तिविरक्त्यास्तीव्रत्वे कारणानि वर्णयन् ज्ञानेन मोक्षप्रकारमाह षड्भिः यमादिभिर्योगमार्गैश्चित्तमभ्यसन् पुनः
पुनरेकाग्रीकुर्वन् आत्मानमुपलभ्य सर्वानस्यूतमद्वयं परमात्मानं प्रतिपद्यत इति षष्ठेनान्वायः सत्येन निष्कपटेनभा

ग्राम्यः स्त्रैवार्गिको धर्मस्तस्मान्निवृत्तिः मितं च तन्मेध्यं शुद्धं च तस्यादनं भक्षणं तत्र मितं नाम द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् मारुतस्य प्रचारार्थं चतुर्थमवशेषयेदिति स्मृतेः शश्वत् विविक्तं निर्जनं क्षेमं निर्बाधं तस्य स्थानस्य सेवनं यावत्तावदर्थप्रयोजनं तावन्मात्रस्य परिग्रहः आसनादीन्योगाङ्गान्याह त्रिभिः ४ ततः आसनस्य जपेन स्थैर्यं ५ स्वधिष्ण्यानां प्राणस्थानानां मूलाधारादीनां मध्ये एकस्मिन्देशे मनसा सह प्राणस्य धारणं आत्मनो मनसः समाधानं आत्मलीकारता ६ अन्यैश्च व्रतदानादिभिः पथिभिरुपायैः आसनादीनि प्रपञ्चयति शुचाविति

ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनं ३ अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनं ४ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः प्रत्याहारश्चेन्द्रियाणां विषयान्मनसा हृदि ५ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणं वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः ६ एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथं बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः ७ शुचौ देशे प्रतिष्ठाप्य विजितासन आसनं तस्मिन्स्वस्ति समासीन ऋजुकायः समभ्यसेत् ८ प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः प्रतिकूलेन वा चित्तं यथा स्थिरमचञ्चलं ९ मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलं

यावदध्यायसमाप्तिः ७ आसनं कुशाजिनचैलोत्तरोत्तरं प्रतिष्ठाप्य स्वस्तिकासने यथासुखमिति वा समभ्यसेत् प्राणवृत्तिनिरोधः उरूजङ्घान्तरा धृत्वा यथा पादाग्रे जानुमध्ये योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः ८ बाह्यवायोरन्तः प्रवेशनं पूरकः अन्तर्वेशितस्य धारणं कुम्भकः धृतस्य बहिर्निःसारणं रेचकः प्रतिकूलेन रेचकपूरककुम्भकैरेचकैः यद्वा इडया पूरयेत् पिङ्गलया रेचनं पिङ्गलया पूर्वं इडया रेचनमिति प्रतिकूलेन वा तावदभ्यासो यथा स्थिरं सत्ते पुनरपि अचञ्चलं यथा न भवति तथा रोधयेत् ९ ध्मातं सन्तप्तमित्यर्थः लोहं सुवर्णं यथाग्निना मलं त्यजति तथा मनो विरजं स्यात् तथा स्वकं च

इदानीं सुषुप्तिसाक्षित्वेन शुद्धात्मप्रतिपत्तिमनुभवतो दर्शयति त्रिभिः भूतादिषु असति असत्तुल्ये अव्याकृते निद्रयालीनेषु सत्सु यस्तत्र तदा विनिद्रो निरहंक्रियस्तमात्मानं प्रतिपद्यत इति तृतीयेनान्वयः ननु यदि तदा विनिद्रोऽसावस्ति तर्हि जाग्रत्स्वप्नयोरिव स्फुटः किं नावभासते तत्राह १४ पूर्वं सदृष्टान्तं द्रष्टृत्वेन सविकल्पतया स्फुटं प्रतीतः सुषुप्तौ तु भूतादेरहंकारविषयस्य लीनत्वात् तद्विषयेऽहंकारे नष्टे सति स्वयमनष्टोऽपि मृषैवात्मानं नष्टवन्मन्यमानो यः अतः तस्य नाशेऽन्यस्य नष्टतुल्यत्वे दृष्टान्तः नष्टवित्तो यथाऽऽतुरो विवशो नष्टवद्भवतीत्यर्थः ननु सुषुप्तौ न किंचिदनुभूयते नैनं सुखमहमस्वाप्सं न किंचिदवेदिषमिति विशेषज्ञानं विना न केवलस्यात्मनः प्रतिसाधनादित्याह एवमिति १५ ननु प्रति

भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः १४ मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा नष्टेऽहंकरणे द्रष्टा नष्टवित्त इवातुरः १५ एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते साहंकारस्य द्रव्यस्य योऽवस्थानमनुग्रहः १६ देवहूतिरुवाच ॥ पुरुषं प्रकृतिर्ब्रह्मन्न विमुञ्चति कर्हिचित् अ॰

न्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो १७ यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः अपां रसस्य च यथा तथा बुद्धेः परस्य च १८ अकर्तुः कर्मबंधोऽयं पुरुषस्य यदाश्रयः गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः ५

संधाने साहंकारस्य प्रतितेः कथं कृच्छ्र इह क्षपयत्विति तत्राह साहंकारस्यापि दद्रूपत्वाच्छत तदुपास्यात्मा तद्व्यतिरिक्तः तमात्मानमित्यन्वयः १६ भक्तिविरक्तिभ्यां सत्यपि विवेके प्रकृतिपुरुषयोः परस्परत्यागाभावान्कथं मुक्तिरिति पृच्छति पुरुषमिति चतुर्भिः पुरुषव्यतिरेकेण प्रकृतेः स्वरूपलाभात् प्रकृतिव्यतिरेकेण पुरुषस्याभिव्यक्त्यभावात् इत्यन्योन्यापाश्रयत्वात् नित्यत्वात्पुरुषं प्रकृतिः कदाचिन्न मुंचतीत्यर्थः १७ व्यतिरेकाभावमात्रे दृष्टान्तः यथा व्यतिरेकतो भावः सत्ता नास्ति गंधस्य कदाचिन्नैदपेक्ष्य यदर्शनादृष्टान्तान्तरं अपामिति बुद्धेः प्रकृतेः परस्य पुरुषस्य १८ श्रीरामजी:

श्री०भा०
ह०टी
८६

मत्तद्विरेफाणां कलो मधुरो ध्वनिर्यस्यां तथा परितं व्याप्तं परार्घ्यानि मूल्यानि हारादीनि यस्य २५ कांचीगुणोल्ल
संती श्रोणी यस्य भक्तानां हृदयांभोजमेव विष्टरमासनं यस्य भक्तानां मनांस्येव वनानि हर्षयतीति यथा २६ अपीच्यमति
तिसुंदरं भक्तिविषयं सुंदरं दर्शनं यस्य कैशोरे तारुण्ये वयसि संस्थितः भक्तानामनुग्रहे कातरं व्यग्रे २७ कीर्तनं

मत्तद्विरेफकलया परीतं वनमालया परार्घ्यहारवलयाकिरीटांगदनूपुरं २५ कांचीगुणोल्लसच्छ्रोणिं हृ
दयांभोजविष्टरं दर्शनीयतमं शांतं मनोनयनवर्धनं २६ अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतं स
तं वयसि कैशोरे भृत्यानुग्रहकातरं २७ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करं ध्यायेद्देवं समग्रा
ंगं यावन्न च्यवते मनः २८ स्थितं व्रजंतमासीनं शयानं वा गुहाशयं प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा २९

कीर्तनार्हं तीर्थयशो यस्य पुण्यश्लोकाः बलिप्रमुखास्तेषां यशस्करं समग्राण्यंगानि यस्मिन् न च्यवते नापयाति न प्रवर्तेति
प्रेक्षणीयमीहितं लीला यस्य तत्त्वेन च समग्रध्यानमुक्त्वा एवैकावयवध्यानमाह २९ श्री [illegible] ॥ श्रीश्री

राम
दी

प्राणायामैरिति वातश्लेष्मादीन् संसर्गान् विषयसंसर्गात् अनीश्वरान् रागान् वपुना सह मनसः स्थिरीकरणं धा
रणा स्थिरस्य वृत्तिसंहतिर्ध्यानं वृत्तिनिरोधः समाधिरिति भेदः ११ सुसमाहितं स्थिरं जातं काष्ठां कल्पामूर्त्तिमित्य
र्थः स्वनासाग्रेऽवलोकनं यस्य एतच्चलयविक्षेपयोः पद्मरहारायध्ये यं हरिमाह सप्तभिः १२ प्रसन्ने वदने नांभोज

प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान् प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ११ य
दा मनः स्वं विरजं योगेन सुसमाहितं काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः १२ प्रसन्नवद
नांभोजं पद्मगर्भारुणेक्षणं नीलोत्पलदलश्यामं शंखचक्रगदाधरं १३ लसत्पंकजकिंजल्कपी
तकौशेयवाससं श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं १४

54

यस्य तं ध्यायेदिति षष्ठेनान्वयः पद्मगर्भवदरुणे ईक्षणे नेत्रे यस्य नीलोत्पलदलवत् श्यामं लसत्पंकजस्य किंजल्क
वत् पीतकौशेये वाससी यस्य श्रीवत्सो लांछनं वक्षसि यस्य भ्राजत्कौस्तुभेनाऽऽमुक्ता संश्लिष्टा कंधरा यस्य १४ ॥